Contains the Sargas one to seven complete and breaks off in the 77th stanza of the eighth Sarga.

Same work as the above.

No. 11508. कुमारसम्भवः.
KUMĀRASAMBHAVAḤ.

Substance, palm-leaf. Size, $17\frac{1}{4}$ × $1\frac{1}{4}$ inches. Pages, 56. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the Sargas one to six and eight.

Same work as the above.

No. 11509. कुमारसम्भवः.
KUMĀRASAMBHAVAḤ.

Substance, palm-leaf. Size, 18 × $1\frac{3}{8}$ inches. Pages, 34. Lines, 9 on a page. Character, Nandināgarī. Condition, injured. Appearance, new.

Contains the Sargas one to seven, but wants the 65th to 86th stanza of the fifth Sarga and breaks off in the 83rd stanza of the seventh Sarga.

Same work as the above.

No. 11510. कुमारसम्भवः, कर्णाटकटीकासहितः.
KUMĀRASAMBHAVAḤ WITH KANARESE MEANING.

Substance, palm-leaf. Size, $16\frac{5}{8}$ × $1\frac{1}{4}$ inches. Pages, 180. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, new.

Contains the Sargas one to three, but wants stanzas 54 to 76 of the third Sarga.

Same work as the above.

No. **11511.** कुमारसम्भवपदान्वयः.

KUMĀRASAMBHAVAPADĀNVAYAḤ.

Pages, 52. Lines, 4 on a page.

Begins on fol. 12*a* of the MS. described under No. 11506.

Contains the prose order of the stanzas in the first Sarga of the Kumārasambhava.

Beginning:

उत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः अस्ति, पूर्वापरौ वारिनिधी विगाह्य पृथिव्याः मानदण्ड इव स्थितः ॥

यमिति । सर्वशैलाः यं वत्सं परिकल्प्य दोहदक्षे मेरौ दोग्धरि स्थिते सति पृथूपादिष्टां धरित्रीं भास्वन्ति रत्नानि महौषधीश्च दु(दु)हुः ॥

End:

सुकेशी शोभनकेशी सा पार्वती अपचितबलिपुष्पा वेदिसंमार्गदक्षा नियमविधिजलानां बर्हिषां च उपनेत्री सती तच्छिरश्चन्द्रपादैः नियमितपरिखेदा [सन्तः] गिरिशम् ईश्वरम् उपचचार ।

Colophon:

इति श्रीकालिदासस्य कृतौ कुमारसंभवे महाकाव्ये प्रथमः सर्गः ॥

No. **11512.** कुमारसम्भवः, सञ्जीविनीसहितः.

KUMĀRASAMBHAVAḤ WITH SAÑJĪVINĪ.

Pages, 340. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 9579.

Contains the Sargas one to eight complete.

The commentary of Kōlācala Mallinātha entitled Sañjīvinī is herein added.

Beginning:

अस्त्युत्तरस्यां (. . .) मानदण्डः ॥

श्लोकान्वयमुखेनैव सर्वं व्याख्यायते मया ।

नामूलं लिख्यते किंचिन्नानपेक्षितमुच्यते ॥

तत्र भवान् कालिदासः कुमारसम्भवं काव्यं चिकीर्षुः आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमिति शास्त्रात् काव्यादौ वक्ष्यमाणानुगुणं वस्तु निर्दिशति—अस्तीति । उत्तरस्यां दिशि । अनेनास्य देवताभूमित्वं सूच्यते । देवता आत्मा अधिष्ठाता यस्य स देवतात्मा । तेनास्य वक्ष्यमाणमेनापरिणयपार्वतीजननादिव्यवहारयोग्यत्वं सूच्यते ।

* * * *

Colophon :

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलचलमल्लिनाथसूरिविरचितायां कुमारसम्भवव्याख्यायां सञ्जीविनीसमाख्यायां प्रथमः सर्गः ॥

समदिवसनिशीथं (. . .) तज्जलौघैः ॥

End :

समदिवसेति । निशीथशब्दो निशामात्रोपलक्षकः । समदिवसनिशीथं तुल्याहर्निशं यथा तथा । तत्र, तस्यां पार्वत्याम् । सङ्गिनः आसक्तस्य । रात्रिन्दिवं रममाणस्येत्यर्थः । शम्भोः शिवस्य । ऋतूनां सार्धमर्धेन सहितं शतं पञ्चाशदुत्तरमृतुशतम् । मानुषमासेन पञ्चविंशतिवर्षाणीत्यर्थः । एका निशेवाभवत् । स शम्भुः । समुद्रान्तर्गतः समुद्रस्यान्तर्वर्ती । ज्वलनो वडवाग्निः । तज्जलौघैः तस्य समुद्रस्य जलप्रवाहैरिव । सुरतसुखैः भिन्नतृष्णो निवृत्ताभिलाषश्च (न) बभूव । किन्तु रिरंसैवावर्धतेत्यर्थः ।

* * * *

Colophon :

इति श्रीमहोपाध्यायकृतकुमारसम्भवव्याख्यायां सञ्जीविनीसमाख्यायां अष्टमः सर्गः संपूर्णः ॥

No. **11513.** कुमारसम्भवः, सञ्जीविनीसहितः.

KUMĀRASAMBHAVAḤ WITH SAÑJĪVINĪ.

Substance, palm-leaf. Size, 15⅝ × 1¼ inches. Pages, 190. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains the Sargas three to eight.

Same work as the above.

The scribe gives his name and date of transcription :

पौराणान्वयजो धीमान् जनैः शेष इतीरितः ।
रामपादाब्जयुगलं ध्यायन् सन्मानसे सदा ॥

विलम्बिवत्सरे मासि कार्त्तिके च शुभावहे ।
कुमारसम्भवव्याख्यां मुदा सम्पूर्णमालिखत् ॥

No. 11514. कुमारसम्भवः, सञ्जीविनीसहितः.
KUMĀRASAMBHAVAḤ WITH SAÑJĪVINĪ.

Pages, 70. Lines, 21 on a page.

Begins on fol. 167*a* of the MS. described under No. 1663.

Contains the Sargas three to six, which last breaks off in the third stanza.

Same work as the above.

No. 11515. कुमारसम्भवव्याख्या—सञ्जीविनी.
KUMĀRASAMBHAVAVYĀKHYĀ: SAÑJĪVINĪ.

Pages, 48. Lines, 5 on a page.

Begins on fol. 8*a* of the MS. described under No. 11503.

Contains the eighth Sarga.

Same work as the above, but without the text.

The transcription of this manuscript is said to have been made by Gaṅgādruḍu, son of Jarugamalli Veṅkaṭaraman, who completed it on Saturday, the 3rd day of the Jyēṣṭha month in the year Sarvajit.

No. 11516. कुमारसम्भवव्याख्या—सञ्जीविनी.
KUMĀRASAMBHAVAVYĀKHYĀ: SAÑJĪVINĪ.

Pages, 30. Lines, 5 on a page.

Begins on fol. 13*a* of the MS. described under No. 11500.

Contains the second Sarga complete.

The former owner of the manuscript is stated to be Dulla Vīrarāghava; copying was finished on Sunday, the 4th day of Caitra Śuddha of the year Tāraṇa.

Same work as the above.

No 11517. कुमारसम्भवव्याख्या—सञ्जीविनी.
KUMĀRASAMBHAVAVYĀKHYĀ: SAÑJĪVINĪ.

Substance, palm-leaf. Size, 13¾ × 1¼ inches. Pages, 28. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains the third Sarga complete.

Same work as the above.

No. 11518. कुमारसम्भवव्याख्या—सञ्जीविनी.

KUMĀRASAMBHAVAVYĀKHYĀ : SAÑJĪVINĪ.

Pages, 78. Lines, 6 on a page.

Begins on fol. 37*a* of the MS. described under No. 11499.

Contains the Sargas one and two.

Same work as the above.

No. 11519. कुमारसम्भवव्याख्या—सञ्जीविनी.

KUMĀRASAMBHAVAVYĀKHYĀ : SAÑJĪVINĪ.

Pages, 26. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 11467.

Contains the first Sarga incomplete.

Same work as the above.

No. 11520. कुमारसम्भवव्याख्या—सञ्जीविनी.

KUMĀRASAMBHAVAVYĀKHYĀ : SAÑJĪVINĪ.

Substance, palm-leaf. Size, 15⅝ × 1¼ inches. Pages, 114. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Contains the commentary on the Sargas five to seven complete, and on the first 72 stanzas of the eighth Sarga.

Same work as the above.

No. 11521. कुमारसम्भवव्याख्या—सञ्जीविनी.

KUMĀRASAMBHAVAVYĀKHYĀ : SAÑJĪVINĪ.

Substance, palm-leaf. Size, 11⅞ × 1¼ inches. Pages, 54. Lines, 7 on a page. Character, Dēvanāgarī. Condition, injured. Appearance, new.

Contains the first Sarga.

Same work as the above, but the additional three stanzas found in the beginning are given below :—

मातापितृभ्यां जगतो नमो वामार्धजानये ।
सद्योदक्षिणदृक्पातसङ्कुचद्वामदृष्टये ॥

अन्तरायतिमिरोपशान्तये शान्तपावनमचिन्त्यवैभवम् ।
तं नरं वपुषि कुञ्जरं मुखे मन्महे किमपि तुन्दिलं महः ॥

शरणं करवाणि कामदं ते चरणं वाणि चराचरोपजीव्यम् ।
करुणामसृणैः कटाक्षपातैः कुरु मामम्ब कृतार्थसार्थवाहम् ॥

No. **11522.** कुमारसम्भवव्याख्या—सञ्जीविनी.

KUMĀRASAMBHAVAVYĀKHYĀ : SAÑJĪVINĪ.

Substance, palm-leaf. Size, 16 × 1¼ inches. Pages, 182. Lines, 6 on a page. Character, Telugu. Condition, injured Appearance, old

Contains the commentary on Sargas one to three and five to eight.

Same work as the above.

No. **11523.** कुमारसम्भवव्याख्या—सञ्जीविनी.

KUMĀRASAMBHAVAVYĀKHYĀ : SAÑJĪVINĪ.

Substance, palm-leaf. Size, 16½ × 1⅜ inches. Pages, 37. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Contains the first Sarga complete.

Copying is said to have been finished on the 12th day of the dark fortnight of the Kārttika month in the year Vikāri.

No. **11524.** कुमारसम्भवव्याख्या—सञ्जीविनी.

KUMĀRASAMBHAVAVYĀKHYĀ : SAÑJĪVINĪ.

Pages, 58. Lines, 8 on a page.

Begins on foll. 6*a* and 23*a* of the MS. described under No. 11477, wherein this work has been omitted to be mentioned in the list of other works given therein.

Contains the Sargas seven and eight.

Same work as the above, but here the text also is given separately from the commentary.

Said to have been copied by Tirumali, son of Śrīvatsācārya.

No. **11525.** कुमारसम्भवव्याख्या—सञ्जीविनी.

KUMĀRASAMBHAVAVYĀKHYĀ : SAÑJĪVINĪ.

Substance, palm-leaf. Size, 12 × 1¼ inches. Pages, 54. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 4*a*. The other work herein is Nalōdaya with commentary 1*a*.

Breaks off in the first stanza of the second Sarga.

Same work as the above.

No. **11526.** कुमारसम्भवव्याख्या—सञ्जीविनी.

KUMĀRASAMBHAVAVYĀKHYĀ : SAÑJĪVINĪ.

Pages, 314. Lines, 7 on a page.

Begins on fol. 27*a* of the MS. described under No. 11505.

Breaks off in the 39th verse of the eighth Sarga.
Same work as the above.

No. **11527.** कुमारसम्भवव्याख्या—सञ्जीविनी.

KUMĀRASAMBHAVAVYĀKHYĀ : SAÑJĪVINĪ.

Pages, 142. Lines, 7 on a page.

Begins on fol. *6a*, *27a*, *40a*, *57a* and *79a* of the MS. described under No. 11501.

This manuscript is said to have been copied by Viñjimūri Subbanna, the copying of the first Sarga having been completed on Sunday, the 12th day of the bright fortnight of the Āśvayuja, that of the second Sarga on Sunday, the 5th day of the bright fortnight of the same month, that of the third Sarga on Monday, the 11th day of the dark fortnight of the month of Phālguna, in the year Rākṣasa, and that of the fourth Sarga on Saturday, the 14th day of the dark fortnight of the Vaiśākha month in the year Nala.

No. **11528.** कुमारसम्भवव्याख्या.

KUMĀRASAMBHAVAVYĀKHYĀ.

Substance, palm-leaf. (Śrītāla). Size, $9\frac{5}{8} \times 2$ inches. Pages, 122. Lines, 9 on a page. Character, Malayāḷam. Condition, good. Appearance, new.

Contains the first Sarga complete.

This commentary on the Kumārasambhava is by Nārāyaṇabhaṭṭa, pupil of Kṛṣṇa. In the introduction the commentator justifies the completeness of the poem in the first eight Sargas; and also refers to another commentator named Śivadāsa whom he proposes to follow in this work. This commentary is being printed in the Trivandrum Sanskrit Series.

Beginning:

षट्पदमुखरितगण्डं कोटीरभरावबद्धशाशिखण्डम् ।
प्रणमत वारणतुण्डं पदकमलप्रणतसकलसुरषण्डम् ॥

अपारकरुणापूरतरङ्गितदृगञ्चलम् ।
कळायकोमलच्छायं जानकीवल्लभं भजे ॥

सुरारातिर्वक्षःकुहररुधिरक्षोदकपिशैः
स्वतः श्वेतैः सन्ध्याकपिशशशिखण्डाम्बुसदृशैः ।
नखोद्योतैर्भक्तप्रकरहृदयध्वान्तभिदुरा
दया काचिद्दिव्या विलसति पुरुश्रेणिविपिने ॥

लोकानामुदयस्थितिक्षतिकरी वन्दारुबृन्दारक-
श्रेणीमौलिमणिप्रभाविकरप्रोद्यत्कराम्भोरुहा ।
भाति ब्रह्मखलालये शशिकलाशुम्भज्जटावल्लरी
भक्ताभीष्टविधानकल्पलतिका काचित्कृपाकन्दली ॥
अङ्के तुङ्गशशाङ्कखण्डधवलं कोटीरभारे वरे
बालादित्यकराङ्कुरप्रतिभटं कण्ठे घनश्यामलम् ।
सत्त्वादीनिव बिभ्रतं त्रिजगतां रक्षादिसिद्ध्यै गुणा-
नानन्दाञ्जलि बालमन्दानिलयं मारारिमाराधये ॥
कृष्णो विबुधाधिपतिर्निष्णातो वितरणेषु विद्यायाः ।
मुष्णातु हृदयतिमिरं पुष्णातु च मङ्गलानि सकलानि ॥
प्राचीनाचार्यकृताः सुविचार्य कुमारसम्भव[स्य]व्याख्याः ।
बालप्रबोधनार्थं ललितं करवाणि विवरणं तस्य ॥
प्राचीनसूरिविहिते महति प्रभूते व्याख्यान्तरे विफल एव परिश्रमो मे ।
वाति प्रकामसुभगे मलयाद्रिजाते वाते फलं किमु करोतु मुखानिलोऽयम् ॥
व्याख्यैकापि तथापि प्रदर्शितान्वयपदार्थवाक्यार्था ।
विवृतसमासोपेता गुरुतरमुपकारमारचयेत् ॥
व्याख्यान्तरेषु दृष्टेषु विमृष्टेष्वपि तत्त्वतः ।
सुभगशिवदासोक्तो मार्ग एवानुगम्यते ॥

इह खलु महाकविः कालिदासः पार्वतीपरमेश्वरपवित्रचरित्रविचित्रं कुमारसम्भवाभिधानं काव्यं चिकीर्षुः "आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्" इत्यादिवचनानुसारेण वस्तुनिर्देशं तावत् करोति—अस्तीति ।

ननु काव्ये यत् साध्यं तदनुसारेणैव काव्यसंज्ञा कर्तव्या । यथा युधिष्ठिरविजयजानकीहरणशिशुपालवधप्रभृतीनाम् । अत्र तु तारकासुरनिग्रहः काव्ये साध्यतया निर्दिष्टः । "तस्मिन् विप्रकृताः काले तारकेण दिवौकसः ।" इत्युपक्रमात् । तस्मात्तारकवध इत्येव काव्यसंज्ञा कर्तव्या । तत्पर्यन्तं च काव्यं प्रवर्तयितव्यं, न चैतत्कृतम् ; तस्मादसमञ्जसमिदं काव्यम् ।

अपि च कुमारोत्पत्तिपर्यन्तमपि न काव्यं कृतम् ; तस्मादनुपपन्नमिदं नामापि इति ।

अत्रोच्यते नात्र तारकासुरनिग्रहः काव्ये साध्यः, "तदिच्छामो विभो स्रष्टुं सेनान्यं तस्य शान्तये" इति देवैः कुमारसृष्टिमात्रस्यैव ब्रह्माणं प्रति प्रार्थितत्वात्। तारकासुरनिग्रहस्तु कुमारोद्भवप्रस्तावकतया निमित्तत्वेनोपक्षिप्तः। यथा किरातार्जुनीये धनञ्जयः। तस्मात्कुमारसम्भव इति काव्यसंज्ञा सूक्ता। न चैवं सति तत्पर्यन्तं काव्यं प्रवर्तयितव्यामिति वाच्यम्,

"उमारूपेण ते यूयं संयमस्तिमितं मनः।
शम्भोर्यतध्वमाक्रष्टुमयस्कान्तेन लोहवत्॥"

इति ब्रह्मणः प्रतिवचने शम्भोश्चित्ताकर्षणमात्रस्यैव परमसाध्यत्वेन प्रतिपादनात्। कारणपौष्कल्ये सति कार्यस्यावश्यम्भाव एव ब्रह्मणस्तथानिर्देशे हेतुरिति चावगन्तव्यम्। शम्भोश्चित्ताकर्षणं पुनरष्टमसर्गे विस्तरतः प्रतिपादितम्। यथोक्तमन्त्यश्लोके—

"समदिवसनिशीथं सङ्गिनस्तत्र शम्भोः
शतमगमदृतूनां सार्धमेका निशेव।
न च सुरतरसेषु च्छिन्नतृष्णो बभूव
ज्वलन इव समुद्रान्तर्गतस्तज्जलेषु॥" इति।

उक्तं च पञ्चमसर्गान्ते देवीं प्रति देवेनैवम्—

"अद्यप्रभृत्यनवमाङ्गि तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ।" इति॥

तस्मादुमारूपेणेत्युपक्रमात् अद्यप्रभृतीति परा(म)र्शात्—"समदिवसनिशीथम्" इत्युपसंहाराच्च शम्भोश्चित्ताकर्षणमात्र एव तात्पर्यम्।

"उपक्रमोपसंहारावभ्यासोऽपूर्वतः फलम्।
अर्थवादोपपत्तिश्च लिङ्गानाञ्च विनिर्णये॥"

इति वचनात्। तच्च सम्यक् प्रतिपादितमष्टमसर्गे सम्भोगवर्णनेन कुमारोत्पत्तेर्बिन्दुविक्षेपमात्रेणेति सर्वमनवद्यम्।

यत्त्वत्र तारकासुरनिग्रहपर्यन्तं चिकीर्षितमिति कैश्चिदुक्तं तदप्युक्तया रीत्या परिहृतं वेदितव्यम्। कवेश्चिकीर्षाया अप्येतत्पर्यन्तत्वस्य समर्थितत्वात्। देव्याः शापाभावं पुनरष्टमसर्गादौ निपुणतरमुपपादयिष्यामः।

ननु कुमारसम्भव इत्यत्र कः समासः? षष्ठीतत्पुरुष इति ब्रूमः। न चैवं सति कुमारसम्भवरूपार्थपरत्वाच्छब्दस्य कुमारसम्भवः काव्यमिति सामानाधि-

करण्यं न स्यादिति वाच्यम् । अभिधेयेनाभिधायकस्यापि बहुशो व्यपदेशदर्शनात् । यथा—"जानकीहरणं प्रबन्धः; शिशुपालवधः काव्यम्" इत्यादिषु इत्यलमतिप्रसङ्गेन ।

प्रकृतमनुसरामः—उत्तरस्यां दिशि हिमालयः नाम नगाधिराजः अस्ति । उत्तरस्यां दिशीत्यनेन हिमवतो देवभूमिष्वन्तर्भाव उक्तः । वक्ष्यति च—"पितुः प्रदेशास्तव देवभूमयः" इति । उत्तरस्यां दिशि देवभूमयः; दक्षिणस्यां दिशि असुरभूमयः; मध्ये मनुष्यभूमयः इति पुराणप्रसिद्धिः । हिमानां तुषाराणामालयो हिमालयः । नामेति प्रसिद्धिवाचकमव्ययम् । हिमवानिति प्रसिद्ध इत्यर्थः । नगानां पर्वतानामधिराजो नगाधिराजः । अधिराजः श्रेष्ठः । अस्ति भवति ।

End :

अपचितबलिपुष्पा इत्यादिना च प्रदर्शितम् । वक्ष्यति च—अथोपनिन्ये गिरिशाय गौरीमित्यादिना इति सर्वं समङ्गलम् ॥

सर्गोऽयं प्रथमो गुणैश्च गिरिजालावण्यसारं परं
यस्मिन्वर्णयति स्म कर्णमधुरैर्वर्णैः कवि(वे)रग्रणीः ।
तत्राहं कृशधीः करोमि किमतिव्यालोलचित्तं तु मा-
मित्थं किञ्चिदजल्पयन् गिरिसुतापादाब्जभक्तिः स्वयम् ॥
गोविन्दाङ्गगुणौघवर्णनविधौ दक्षस्य नारायण-
क्ष्मादेवस्य कृतौ गिरीशगिरिजाभक्तिप्रवृद्धोदये ।
व्याख्यानेऽत्र कुमारसम्भवपदार्थालोचनप्रक्रिया-
निष्णाते प्रथमः समाप्तिमगमत्सर्गो निसर्गोज्ज्वलः ॥

Colophon :

इति श्रीकृष्णशिष्यस्य नारायणस्य कृतौ कुमारसम्भवविवरणे प्रथमस्सर्गः ॥

No. **11529.** कुमारसम्भवव्याख्या.

KUMĀRASAMBHAVAVYĀKHYĀ.

Substance, paper. Size, 11 × 8¾ inches. Pages, 72. Lines, 25 on a page. Character, Dēvanāgarī and Grantha. Condition, good. Appearance, new.

Begins on fol. 131*a*. The other works herein are Vāsavadattāvyākhyānam 1*a*, Vāsavadattāvyākhyānam (different) 53*a*.

Contains the commentary on the first Sarga.
Same work as the above.

No. 11530. कृष्णविजयः.
KṚṢṆAVIJAYAḤ.

Substance, paper. Size, 11 × 8⅛ inches. Pages, 207. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

A poem in 12 Sargas describing the Puranic story of the birth and other leading incidents in the life of Śrī Kṛṣṇa. The author of the work is stated to be one Śaṅkara, a disciple of Rāghava of Vihāravalla in Kēraḷa; and he is said to have composed this poem at the instance of Kēraḷavarman, king of Kollam (Quilon in Travancore).

Complete.

Beginning:

मदापगाशीकरसेकशीता माध्वीलिहां मांसलिता निनादैः ।
हरन्तु तापं हरनन्दनस्य कल्याणदाः कर्णसमीरणा मे ॥
आकम्रमन्दाररुचं कवीन्द्रमाकन्दवासं तुरगाविलासम् ।
एकं निधानं वचसामुपासे पाकं पयोजासनपुण्यराशेः ॥
कल्याणबीजाङ्कुरजन्महेतुः कटाक्षकालाम्बुधरो गुरूणाम् ।
प्रनर्तयत्वाशु गुणाम्बुवर्षै(र्वाचं) मयूरीं मम दीनदीनाम् ॥

* * * *

चकास्ति राजा चतुरन्तवीरचूडातटीचुम्बितपादपीठः ।
काला(रि) कूलङ्कषबाहुतेजाः कोलाधिपः केरलवर्मनामा ॥
शिवेश्वराख्ये भवनोत्तमे यः श्रुत्यन्तरात्यन्तनिगूढरूपम् ।
प्राकाशयत् प्रौढतपःपटिम्ना पञ्चेषुलीलापरिपन्थि तेजः ॥
प्रचण्डिमा शिक्षयते यदीयदोर्दण्डजन्मा रिपुसुन्दरीणाम् ।
पत्रांशुकानां परिधानरीतिं कन्दाशनं काननचङ्क्रमं च ॥
उर्वीभरं बिभ्रति यत्र नृणां गुर्वीं मुदं तन्वति चान्नदानैः ।
दर्वीकरेन्द्रश्च करारविन्दे दर्वी च विश्राम्यति शैलजायाः ॥
पात्रं श्रियस्तत्र चकास्ति राज्ये क्षेत्रं विहारावल्लनामधेयम् ।
जगत्सावित्री खलु यत् पवित्रीकरोति नीहारगिरीन्द्रपुत्री ॥
विभाति तस्मिन् गिरिजाकटाक्षपात्रीभवन् कश्चन सूरिवर्यः ।

श्रीकोलभूपालकहर्षसिन्धुराकाशशी राघवनामधेयः ॥
सदा मनीषामयताम्रपर्णीसंवर्तिनो वाङ्मयमौक्तिकानि ।
भाग्यैकसिन्धोः समवाप्य यस्मात् सुधीजनः कण्ठमलङ्करोति ॥
अन्ते वसन् कश्चन तस्य चाभूत् कवित्वमार्गे कलितप्रचारः ।
आचार्यकारुण्यजलप्ररूढप्रज्ञाङ्कुरः शङ्करनामधेयः ॥
अर्धं शरीरस्य च शीतभानोः कलत्रयन्ती च वतंसयन्ती ।
काचित् पुरा कण्वपुरैकभूषा कामप्रसूर्यत्कुलदैवमास्ते ॥
नित्यं विहारादिजुषो भवान्यास्स्तोत्राम्बुभिस्सन्नतिदोहलैश्च ।
अकारि यस्याङ्कुरितो महीयान् नवत्वमाश्रित्य कवित्वशाखी ॥
कोलेश्वरस्तं मुदितः कदाचिदास्थानवर्ती नृपचक्रवर्ती ।
निष्णातधीः कृष्णकथानुबन्धं काव्यं कुरु श्राव्यमिति न्यगादीत् ॥
कुतोऽपि कोलेन्द्रवचस्समीरसम्प्रेषणाद्देशिकदृष्टिनावा ।
भक्तिद्वितीयाथ तदीयवाणी पारं गता कृष्णकथापयोधेः ॥

* * * *

दैत्याधिराजतिमिरप्रकराणि हन्तुं
दीप्त्यान्वितो दिव इवाथ मयूखमाली ।
गर्भं मुदा निविविशे वसुदेवपत्न्या
भाग्योदयेन जगतां भगवान् मुकुन्दः ॥

Colophon:

इति शङ्करकृतौ श्रीकृष्णाभ्युदये प्रथमः सर्गः ॥

End:

हृत्पङ्कजेषु महतां विहृतिं वितन्वन्
वक्षोरुहेष्वपि च पक्ष्मललोचनानाम् ।
नेत्रासवं स वपुषा जगतां त्रयाणां
श्रोत्रामृतं च चरितैर्विततान शौरिः ॥
न जानन्तो दुःखं कथमिति विदन्तो न विपदां
कथञ्चामी कृष्णे हितकर(ण)निष्णे यदुजनाः ।
पुरे पूर्णानन्दा नियतमवसन् कल्पकतरोः
तटे वास्तव्यानां जगति किमलभ्यं तनुमताम् ॥

मित्रौघान् सुखयन् द्विषः प्रशमयन् लोकत्रयीं पालयन्
देवार्तिं दमयन् वधूस्तरलयन् कीर्त्या जगत् पूरयन् ।
आनन्दं घनयन् सतां तिलकयन् स्वीयां पुरीं प्रीणयन्
ज्ञातीन् कन्दलयन् मुदं प्रणमतां रेमे स दामोदरः ॥

Colophon :

इति शङ्करकृतौ श्रीकृष्णविजये द्वादशः सर्गः ॥ समाप्तश्चायं ग्रन्थः ॥

No. **11531.** कृष्णाभ्युदयम्.
KṚṢṆĀBHYUDAYAM.

Substance, paper. Size, 10¾ × 8½ inches. Pages, 8. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 35*a*. The other work herein is Śravaṇānanda 1*a*.

Contains the first stanza of the first Sarga and the whole of the second Sarga.

Similar to the above. By Varadadēśika, son of Appayārya of Ātrēyagōtra and author of Kārikādarpaṇa and other works. He is also said to have been a descendant of Vādihaṁsāmbudācārya and a disciple of Varadaguru.

Beginning :

यत्कारिकादर्पणाख्यकृतिनावा भवाम्बुधिम् ।
सन्तस्तरन्ति वरदगुरवे श्रीमते नमः ॥
श्रियः पदं श्रीकमितुस्तनुर्यथा विमुक्तिदा च स्मरतां शुभा पुरी ।
बलैरयोध्या मथुरा च नामतो गुणैर्विशाला विभवैरवन्ती ॥

. . . .

तमनादिमनन्तमप्रमेयं वसुदेवप्रमदावसुंधरा सा ।
अपि भूतपतेरशक्यसेवं निधिमाधत्त निरञ्जनैकदृश्यम् ॥
प्रतिबिम्बमवोढ पद्मिनी सा परमे व्योम्नि विधोः प्रकाशभाजः ।
तमुदीतमवेक्ष्य किं तदीयस्तनकोकौ मलिनाननावभूताम् ॥

* * * *

कबलिततिमिरा करालदंष्ट्रा करनिकरैरधिरूढकेसरीन्द्रा ।
इति निगदिता (गदितवती) मुकुन्दमाया गहनमगाहत कालिकेव माया ॥
कारंकारं मन्त्रिभिः कार्यचिन्तां वारंवारं वैरिणं हन्तुकामः ।
घोराकारान दानवान प्रेक्ष्य कंसः कारागाराद् दम्पती तौ मुमोच ॥

Colophon:

इति श्रीमदात्रेयवादिहंसाम्बुदवंशावतंसकारिकादर्पणाद्यनेकग्रन्थकर्त्रप्प यार्यतनूभवश्रीवरददेशिकनिर्मितेषु कृष्णाभ्युदये द्वितीयः सर्गः ॥

See under the next number for the end.

No. **11532.** कृष्णाभ्युदयम्.

KṚṢṆĀBHYUDAYAM.

Substance, palm-leaf. Size, 18¼ × 1⅛ inches. Pages, 96. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains the Sargas two, three, eight, ten, 11 and 12 and two other Sargas which cannot be indentified.

Same work as the above.

See under the previous number for the beginning.

End:

स विस्मितः सस्मितलेशमीशं विज्ञापयन् वृत्तमिदं विचित्रम् ।
पूषात्मजापूरमतीत्य तेन रथेन निन्ये रिपुराजधानीम् ॥
अक्रूरे गतवति पूर्वमात्मगेहं नन्द्याद्यैः सह नगरं विगाहमानौ ।
पुष्णन्तौ भुव इव शर्म पुष्पवन्तौ दीव्यन्तौ दितिजरिपू विदिद्युताते ॥
अक्रूर एव न तदागममभ्युपेत्य कंसस्य कर्णसविधे कथयाम्बभूव ।
क्रूरः परं तु यदुपुङ्गवभज्यमानकोदण्डदण्डरवडामरडिण्डिमोऽपि ॥
युगविगमगभीरोत्पातनिर्घातदीर्घध्वानिजनितदिगन्तस्फोटमुन्मथ्य चापम् ।
रघुपतिरिव सीतां रक्षिता सज्जनानां श्रियमभजत भूयः श्रेयसीं श्रीनिवासः ॥

Colophon:

इत्यात्रेयवरदगुरुचरणनलिनचञ्चरीकस्य वरदराजयज्वनः कृतिषु कृष्णाभ्युदये द्वादशः सर्गः ॥

No. **11533.** कृष्णायनम्.

KṚṢṆĀYAṆAM.

Substance, palm-leaf. Size, 16¾ × 1⅝ inches. Pages, 252. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old. The right hand corners of the leaves are injured.

Contains the Kāṇḍas one and two, each containing six Sargas.

This is a poem on the story of Kṛṣṇa apparently composed in imitation of the Rāmāyaṇa of Vālmīki. In the place of the title Ādikāvya applied to the Rāmāyaṇa, this work bears the name Anantarakāvya, the later poem. It is stated to have been related by Bhāradvāja. Nothing is known about the real author and the date of the composition of the work; but the work must be a modern one, as it is quite unknown. There is reference in the work to Rāmānuja.

The portion contained in the MS. begins with the creation of the world in the first canto and ends with the marriage of Lakṣaṇā in the second. The extent of the work is not known as the manuscript contains only a fragment thereof.

The colophons at the end of the Sargas give the following headings:—

I Kāṇḍa,	Sarga	1. सृष्टिप्रकरणम्——266 stanzas.
,,	,,	2. Wanting.
,,	,,	3. 13 leaves only in the beginning; stanzas not numbered.
,,	,,	4. द्वारकापुरनिर्माणम्——187 stanzas.
,,	,,	5. Fol. 65 ends with the 91st stanza and fol. 66 is wanting, so the end is not available.
,,	,,	6. मृगयाविहारः——259 stanzas.
II Kāṇḍa,	Sarga	1. धर्मविचारः——32 stanzas.
,,	,,	2. सानुगिरिमाहात्म्यप्रतिपादनपूर्वकब्रह्मविचारः——252 stanzas.
,,	,,	3. श्रीभरद्वाजकृतभगवत्साक्षात्कारः——stanzas not numbered.
,,	,,	4. श्रीभरद्वाजाभीष्टप्रदानम्——144 stanzas.
,,	,,	5. लक्ष्मणा(क्षणा)विवाहः——288 stanzas.
,,	,,	6. लक्ष्मणाकुमारोदयः——90 stanzas.

Beginning:

मदीया चेन्न स्यात्कृतिरधिकदोषैकवसतिः

भवेद्दोषज्ञत्वं विदुषि विषयाभावनिहतम् ।

गुणा यद्यत्र स्युः सुखमनुभवेत्किं खलजनो

न किं प्रीतिः स्वामिन्नपगुणनिबन्धादपि तव ॥ ८ ॥

स्तुतिं के चिन्निन्दां कति च विदधानास्तव फलं
समानं सम्प्राप्तास्तदुभयमकृत्वैव तु वयम् ।
हरे तत्प्राप्स्यामः कृतिरपि तु सामर्थ्यविरहं
प्रदर्श्यानुक्रोशं प्रजनयतु भावत्कमिति नः ॥ ९ ॥
कृपासान्द्रा विष्णोर्जगति बहुशः सन्त्यवतराः
न तान् स्तोतुं शक्तो गणयितुमुमेशो विधिरपि ।
तथापि स्तोष्यामि प्रवरगुणबृन्दं मुररिपुं
यदेतस्य स्तुत्या नुतिमवतराणां शतमियात् ॥ १० ॥
ततस्तस्यैवाहं मधुरमपदानं ललितया
गिरा नावंनावं मुदमुपहरिष्यामि विदुषाम् ।
यथा चैत्रे मासे मलयमरुदुत्फुल्लकुसुम-
प्रसूतैर्माकन्दैः सरससहकारो मधुलिहाम् ॥ ११ ॥
समादाय स्वैरं कति च(न) पदार्थास्तत इतो
मरुन्द्रनां बिन्दून् सरससुमनोभिः परिचयात् ।
अहं पुञ्जीकुर्यां सपदि सरघावन्मधुस(भि)दे
प्रबन्धेऽस्मिन् मोदात्पिबत मधुरास्वादरसिकाः ॥ १२ ॥
समस्तान् वेदान्तानतिनिपुणमालोच्य विविधैः
पुराणैर्गीताभिः स्मृतिभिरितराभिश्च बहुधा ।
विनिर्णीतां रामानुजमुनिभिरालम्ब्य सरणिं
जगत्प्रादुर्भावं विविधमहमिच्छामि भणितुम् ॥ १३ ॥
प्रलिल्ये गन्धे भूरधिजलमयं तन्निजरसे
स वह्नौ रूपेऽयं मरुति तदधिस्पर्शमनले(निलः) ।
स को व्योम्नि ध्वाने तदयमधिभूतादि स मह-
त्यसौ जीवैः सार्कं तमसि तदिवैकं मुरभिदा ॥ १४ ॥

End :

सनादि केन्द्रगतेषु शुभग्रहेष्वपि भजत्सु तदा परमोच्चताम् ।
अहिमरोचिषि मेषमुपाश्रिते सुतमसूयत मद्रनृपात्मजा ॥ ८१ ॥
निरवधौ निममज्ज मुदम्बुधौ यदुपातिर्विनिशम्य तदुत्सवम् ।
अपि ददौ रुचिराम्बरभूषणान्यमुमुदन्तमुदाहरतेऽखला ॥ ८२ ॥

जननहेतुकमप्यकृताखिलं सपदि कर्म शुभं यदुनन्दनः ।
वसुमतीसुरब(बृ)न्दमतूतुषद् विविधदानततिं समुदाचरन् ॥ ८३ ॥
प्रघोषो निस्साणप्रभृतिसुरवाद्योपजनितोऽ-
भवद्यस्मिन् जाते तमतनुत नाम्ना यदुपतिः ।
प्रघोषं पुत्रं स्वं निजकुलपुरोधःप्रभृतिभिः
समेतोऽन्यैर्विप्रैः शुभगुणगणै . . . . दिने ॥ ८४ ॥
अनिशमापततैवमुपर्युपर्यमितमोदभरेण युतो हरिः ।
विहरति स्म स मद्रतनूजया सह विदर्भजयापि ससत्यया ॥ ८५ ॥
लसति यो रमया परमे पदे दिनकरेऽम्बुनिधौ हृदि योगिनाम् ।
अवततार जगद्बहुधावितुं विजयतेऽत्र गिरावधुनापि सः ॥ ८६ ॥
भरद्वाजश्श्रीमान्वसति मुनिवर्यो यदुटजे
स्वयं तस्योपान्ते मणिरचितसौधे यदुपतिः ।
रमाभूमीनीळाप्रतिकृतिभिराभिः सह सदा
वसन्त्सान्वद्रौ संरमयति नतामेष जनि(न)ताम् ॥ ८७ ॥
तदनुग्रहतो द्विजात्मनास्मिन् मुदमादातुमना नृणां सुरौघः ।
वदनाहृतवेदवेदमूर्धा चिदनाविष्करणे रतोऽस्ति शैले ॥ ८८ ॥
सततं तरवः फलन्ति सौनं विततं मञ्जुलता ततिं प्रसूते ।
गततत्कुहरा मुदा जनालिः सुततन्नृमुखं निरीक्षतेऽत्र ॥ ८९ ॥
शृण्वन् पठन् काव्यमिदं लभेत भक्त्या द्विजातिश्चतुरः पुमर्थान् ।
जीवोऽपि कृत्स्नं महिमानमस्य नालं प्रवक्तुं किमुतैष लोकः ॥ ९० ॥

Colophon :

इत्यार्षे श्रीमत्कृष्णायने तदनन्तरकाव्ये भगवदनुग्रहलब्धे भरद्वाजप्रोक्त-द्वितीयकाण्डे लक्ष्मणाकुमारोदयो नाम षष्ठः सर्गः ॥

चरितं रघु(यदु)नाथस्य शतकोटिप्रविस्तरम् ।
एकैकमक्षरं प्रोक्तं महापातकनाशनम् ॥
कंसान्तकाय विलसन्मणिकुण्डलाय गोपीजनस्य कुचकुङ्कुमरञ्जिताय ।
मन्दस्मिताय सितनीरजलोचनाय कृष्णाय नन्दतनयाय नमो नमस्ते ॥
कृष्णाय यादवेन्द्राय ज्ञानमुद्राय योगिने ।
नाथाय रुक्मिणीशाय नमो वेदान्तवेदिने ॥

No. 11534. कृष्णार्जुनीयम्.
KṚṢṆĀRJUNĪYAM.

Substance, paper. Size, $8\frac{7}{8} \times 5\frac{5}{8}$ inches. Pages, 284. Lines, 8 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete in nine Sargas.

This poem describes certain leading incidents in the life of Śrī-Kṛṣṇa and Arjuna as related in the Mahābhārata; and they are said to be the incarnations of Nārāyaṇa and Nara. The extent of the work is not known.

Beginning:

इक्षुक्षीराम्भोनिधौ लीलया यो मग्नोन्मग्नोज्जृम्भितात्मोर्ध्वहस्तः ।
हुङ्कारौघैर्घोरघोषीकृताशो वेतण्डास्यो मङ्गलं वो विधत्ताम् ॥
इन्द्रप्रस्थं नाम तत्पाण्डवानामासीत् स्थानं सत्कुरुक्षोणिभागे ।
राज्ञा दत्तो यः पृथासम्भवानामाहूयारादम्बिकानन्दनेन ॥
श्रीकृष्णेन द्वारकेवादरेण त्वष्ट्रा साक्षात्कारिता निर्जराणाम् ।
सा पूर्येषां प्रेमबन्धेन पैतृष्वस्त्रीयाणामिन्द्रसंप्रेषितेन ॥
क्षेत्रे पाण्डोर्धर्मवातेन्द्रदस्त्रैर्मन्त्राहूतैर्माविताः काननान्ते ।
नीता विप्रैर्यैं पितृव्यं तदीयैः पुत्रैर्द्विष्टाः द्रौपदीं व्यूहुरैक्यात् ॥
तेषां विष्णोरर्जुनस्त्वंशभूतो विष्णुः साक्षादेष नारायणश्च ।
सख्येनास्य प्राङ्नरस्योदितेन प्रायस्तत्रैवावसद्वृष्णिवीरः ॥
यौ द्वौ पूर्वं कल्पितौ भारतेऽस्मिन् खण्डे देवार्च्चनीयौ त्रिधाम्ना ।
रक्षाहेतोस्तौ बदर्याश्रमस्थौ दैत्याघातायावतीर्णौ धरायाम् ॥

* * * *

Colophon:

इति कुमाराहरणोदर्के कृष्णार्जुनीयाख्ये काव्ये प्रथमः सर्गः ॥

End:

इत्थं संभाष्य सन्तोष्य भगवान् भूतभावनः ।
दारुकाहृतमालक्ष्य दारकान्वेषणोत्सुकः ॥
फल्गुनं परिरभ्याथ रथमारोप्य पाणिना ।
स्वयञ्चारूढवान् पूर्वं समारूढमनोरथः ॥
प्रतीचीं प्रायेण प्रभुरथ दिशं प्रत्यनुल्पन्
सखे सम्यग्वन्द्यं वरविभुपदं साम्प्रतमिति ।

गुडाकेशः केशिद्विषदिह स शोकप्रशमन-
प्रसन्नात्मानं तं प्रकृतिमधुरं प्रास्थित शनैः ॥

Colophon:

इति श्रीकृष्णार्जुनीये नवमः सर्गः ॥

No. 11535. जाम्बवतीपरिणयम्.
JĀMBAVATĪPARIṆAYAM.

Substance, palm-leaf. Size, 11¾ × 1½ inches. Pages, 44. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Breaks off in the fifth Sarga.

This poem describes how Kṛṣṇa got the Syamantaka jewel by conquering Jāmbavat and married his daughter, Jāmbavatī. By Ēkāmranātha, who composed this poem at the instance of Immaḍi-Aṅkuśa of the Rāṇā family. The genealogy of his family is given in the introduction:—

Timma = Mallamā
|
Siṅga = Gaṅgamā
|
Jagadēkarāya or Pedajagadēkarāya = Giryambā
|
Jagatāparāya. Jagadēkarāya. Jagatāparāya. Aṅkuśa = Liṅgama* + Viṭṭhalāmbā.
(sons of Aṅkuśa and Liṅgama:) Kumārajagadēkarāya. Immaḍi-Aṅkuśa Nṛsiṁha.
(son of Aṅkuśa and Viṭṭhalāmbā:) Vēṅkaṭapati.

Beginning:

श्रीगौरीरमणौ शितिप्रभतनू चन्द्रांशुकालङ्कृतौ
रक्षोद्गसदनन्तमण्डनयुतौ शुच्यब्जमित्रेक्षणौ ।
देयास्तां बलिदैत्यगर्वहरणप्रौढौ महानन्दकौ
नित्यामिम्मडि-अङ्कुशाह्वयमहीनाथाय पूर्णां श्रियम् ॥
अन्ये भजन्तु बहुविघ्नभुजङ्गमाना-
मुत्सारणाय कवयो भुवि कौशिकादीन् ।
नित्यं भजामि विनतार्तिहृतिप्रसिद्ध्या
युक्तं विनायकमहं मनसा गि(रा च) ॥
अस्त्येकं विबुधावनप्रथिततायुक्तं बुधानामपि
प्रख्यातं शरणं समाख्यविधुतामेष्यामि सद्धामतत् ।

---

* Daughter of Virappa.

यातं निर्गुणमप्यनन्तगुणवद्ब्रह्मोत्तमानुत्तमं
गोविन्दाख्यममुष्य पादयुगलाद्वर्णो महान् प्राभवत् ॥
वर्णेऽस्मिन् किमु सर्ववर्णगुरुतायुक्तेन वंशो रघो
राणावंशवरेण वर्णलघुतायुक्तः समानो भवेत् ।
तद्वत्किं भरतान्वयोऽपि सदृशो नैवं यदोरन्वयः
किश्वासङ्कुचकशौरिणा किमु समः सत्त्वैकशौर्यान्वितः ॥
तस्माद्वंशवरान्नितान्तभुवनख्यातादवे(ला)तिगा-
ल्लक्ष्म्युत्पत्तिनिदानतामधिगताद्विष्णवङ्घ्रिजातान्वितात् ।
श्रीमानिम्मडि-अङ्कुशक्षितिपतिर्जैवातृकत्वं गतो
न(न्मा)वाप यदा महाजलनिधेरिन्दुः कलानां निधिः ॥
गोविन्दो वसुदेवतः किमु पुरेवार्याङ्कुशक्ष्माभृतो
दम्भेनेम्मडि-अङ्कुशक्षितिपतिर्जन्माभजद् भ्रातरि ।
माढ(ण्ड)क्ष्मारमणस्य वित्तबलभद्राभिख्यकत्वं कथं
नो चेद्वाद्यखिलोग्रसेनभवखेदाभाववत्त्वं क्षितेः ॥
रक्षत्युर्वीं स शूरः करघटितमहातीक्ष्णकौक्षेयकाग्र-
प्रोद्भिन्ना(रि)क्ष्मापक्षतजपिशितसन्तृप्तभूतौघनुत्यः ।
भोगेनाधःकृतेन्द्रो धनवितरणतो हर्षयन् भूमिदेवान्
भव्यैर्युक्तः स्वकीर्त्या पिहितगिरिसुतानाथकण्ठस्थनैल्यः ॥
भूपालोऽयं कदाचिद् बहुबुधवरसङ्घान्वितायां सभायां
काव्यप्रस्तावयुक्तो निखिलरसलसत्काव्यसङ्ग्राहमिच्छुः ।
दक्षोऽप्येतद्विधा(य) स्वयमपि कृपया . . . यशो मेतुं
. . . . . भाच्छद्मनेत्थं मधुरमिव सुधां वाक्यमाहूय मा(चा)ह ॥
एकाम्राख्यकवीन्द्र तावकगिरो लक्ष्मीयशःकारणा-
न्यन्येषां तु वचांसि संविदधते कीर्तिं परं भूतले ।
भ्राता येन ममेति माण्डमाहिभृत्पूर्वाधिकां संपदं
त्वत्काव्येन युतः कुमारजगदेकाद्भुतश्रीशालय ॥
ब्रूते लब्धप्रथिताद्वयोत्तरपदं कर्मावबोधार्थक-
न्मीमांसामतिभाक्तनो चतुरतामेकाम्रकः स्फुटम् ।

वेदान्तार्थसुबोधशङ्करतुलां पूर्वं परं प्राह(प)त-
द्युग्मे पण्डितता च तर्ककृतितां यस्मादिदं तद्युतम्* ॥
यत्सर्वैरभिवीक्ष्यसे वररुचिस्तच्छन्दश्शास्त्रज्ञतां
छन्दश्शास्त्रकृतित्वमप्यधिगतः सद्वृत्ततासौ त्वया ।
ब्रूतेऽलङ्कृतिशास्त्रविज्ञतरतां काव्यप्रकाशः कृत-
स्तस्मात्काव्यविधानपण्डिततरस्त्वं मे परं संमतः ॥
एकं पद्यमपि प्रयत्नसहिताः कृत्वापशब्दान्वितं
प्राप्ता मत्सविधं कथं न्वयमिति प्रश्नं गताः क्रुद्धताम् ।
संप्राप्ता महितां स्वनिष्ठजडतामारोपयन्ते मयि
प्राज्ञा मद्वचनेषु ये कुकवयस्तेभ्योऽस्म्यहं साञ्जलिः ॥
विद्वद्भिः कषणे कृतेऽपि नित(रां) न क्रुद्धतां यद्भवान्
मादृक्षैर्भजते परोक्तिसुगुणग्राही कवीन्द्रस्ततः ।
त्वं तस्मात् प्रतिपद्यमद्य रचयस्वैकं चमत्कारवत्
प्राप्तं शौरिकथां मदङ्कितमहाकाव्यं रसैरुज्ज्वलम् ॥
तिष्ठन्ति क्षितिमण्डले बुधमणे वापीतटाकामर-
स्थानाराममुखानि तानि सुकृतस्याप्तेर्निदानानि यत् ।
कश्चित्कालमिदं तु तिष्ठति यदाकल्पं रसेनोज्ज्वलं
शब्दब्रह्ममयं कृतं सुकविना काव्यं तदेभ्योऽधिकम् ॥
इत्थं तस्य महीपतेर्गिरमहं श्रुत्वापि हर्षान्वितः
प्रावोचं पुरतो न ते फणिपतिः सम्यक् क्षमो भाषणे ।
किन्तु प्राप्य कृपारसेन कलितं तेऽनुग्रहं साध्वसं
सन्त्यज्येम्मडि-अङ्कुशक्षितिपते काव्यं करिष्याम्यहम् ॥
क्वेदं तावकचन्नपट्टणमहो श्रीशैलमुख्याचलै-
रत्यन्तं व्यवधानवत्सुमहिता मर्कोण्डवीटी पुरी ।
मध्यस्थानखिलानतीत्य महिमा(ता)नत्या(भ्या)गमो मामको
दृगादिम्मडि-अङ्कुशक्षितिपते सर्वज्ञताज्ञापकैः ॥
सृष्ट्वा मादृशपण्डितान्यदसृजत् सर्वान् क्षमानायकान्
मूढान् बाढमपात्रदाननिरतान् पद्मोद्भवस्तद्भवाम् ।

स्वीयाकीर्तिमपाकरोदतितरां विद्याव्रजस्यार्पकं
त्वां दृष्ट्वेम्मडि-अङ्कुशक्षितिपते विद्वत्सुपर्वद्रुमम् ॥

श्रुत्वा सत्कविवर्ण्यभोजमहिभृत्सर्वज्ञशिङ्गक्ष्मा-
भृत्पाण्डित्यमवेक्ष्य भूतलपतीनज्ञानिदानीन्तनान् ।
विश्वासोऽजनि नात्र सम्प्रति भवत्पाण्डित्यमत्यद्भुतं
संवीक्ष्येम्मडि-अङ्कुशक्षितिपते तत्साधु विश्वस्यते ॥

ये पश्यन्ति वरेण्यनीचपदयोरुत्पाद्य वादं महा-
हासं प्राप्य तु मल्लयुद्धमिव तं विश्वंभरेशाधमाः ।
तेषां तावकभृत्य एव हि वि(भो)किं तारतम्ये बुध-
व्रातस्येम्मडि-अङ्कुशक्षितिपते त्वत्तोऽपरो बुध्यते ॥

भावत्कं बहुमानमेत्य लसतो निन्दां ममापण्डिताः
कुर्वन्त्विम्मडि-अङ्कुशक्षितिपते काचित् क्षतिर्नो तया ।
सर्वज्ञेन धृतस्य मूर्ध्नि रचिता सेन्दोः कलानां निधेः
किं निन्दा विधुनोति चारकुलटाषिड्गैस्तदुत्कृष्टताम् ॥
इत्युक्त्वा प्रतिपादितेन धरणीनाथेन पट्टांशुक-
व्रातेनाप्य मुदं च रत्नविलसद्भूषागणेनादरात् ।
काव्यं कर्तुमहं प्रयत्नमितवानस्याधिपस्यान्वयं
वक्ष्यामीम्मडि-अङ्कुशक्षितिपतेर्लोकोत्तरं सद्गुणैः ॥

शिङ्गक्ष्मारमणोऽजनिष्ट महिते राणान्वये मल्लमा-
नामाश्वत्तरु(णीम)णेर्जननुतात्तिम्मक्षमाखण्डलात् ।
धत्ते विश्रुतलोकबान्धवपदं गर्व्यं त्यजन् मित्रतां
संप्राप्तो विजितः सहस्रकिरणो यस्य प्रतापेन किम् ॥

* * * *

शिङ्गक्ष्माभृदजीजनद्गुणयुतं धैर्याचलं गङ्गमा-
नामाश्वयुवतीमणेस्त्रिभुवनप्रख्यातशौर्योदयम् ।
कीर्त्याढ्यं जगदेकरायमतुलं जग्राह यः संयुगे
सञ्जित्यागणितान् बुराणनगरीनाथं गुज्ज(न) घोटकान् ॥
पश्चास्याभिख्ययाप्तः करजरुचिलसद्धेतिनिर्भिन्नवैरि-
क्ष्माभृत्कुम्भीन्द्रकुम्भव्रजविनिपतितैर्भूरिमुक्ताफलौघैः ।

कुर्वन् व्याप्तां धरित्रीं निखिलबुधगणैः शूरवर्याग्रगण्यो
भाति स्मायं नितान्तं भुवि पेद्जगदेकावनीनाथसिंहः ॥
सूर्याभौ जगतापरायजगदेकावन्यधीशौ परं
धैर्याढ्यं जगतापरायममलं शौर्येऽङ्कुशक्ष्माविभुम् ।
गिर्यम्बाह्वययोषितीन्द्रसदृशानुत्पाद्य पुत्रानमून्
भाति स्मैष पुरा यथा दशरथो रामादिभिः स्वात्मजैः ॥
एतेषां जगतापरायनृपतेः किं भैरवस्तुल्यता-
मश्वारोहणमण्डितस्य समरे श्वारोहणे पण्डितः ।
प्राप्नो(ति) प्रथितस्य शात्रवजयैर्नित्यं भजेत्तुल्यतां
संजातो विजयी प्रथां त्रिभुवने भीमानुजो निर्भरम् ॥
चित्तारवा(नन्)पेन्द्रबन्धविलसद्रज्जुत्वशौर्योदयो(या)-
न्नूरूमूर्तिजिखानसैन्यकमहारण्यैकदावानलः ।
विष्णुर्भाति सुजातखानमकरग्रस्तैर्नमत्केभसं-
रक्षायां जगदेकरायनृपतिर्दुष्टान्धकारारुणः ॥
इत्थं तेन जिताः समस्तयवना युद्धेषु भीत्यान्विताः
तीक्ष्णात्युन्नतकण्टकद्रुममहारण्यानि वेगान्विताः ।
संप्राप्य स्वकमूर्धजेषु नितरामाकृष्यमाणा मुहु-
र्नूनं तद्गतकण्टकैस्तु न सहन्त्यद्यापि तान् मूर्धसु ॥
सान्द्रैस्तज्जगदेकरायनृपतेः सैन्यैर्निरोधायकं
प्राप्यालं परितो निशातविशिखैः स्वेभ्यः प्रविद्धात्मताम् ।
यातेभ्यः सरणेरभावमधिगत्यादाद्रविः पद्धतिं
स्वस्मिन् किन्नु मजन्ति ते न यवनाश्चाद्यापि तं दैवतम् ॥
गङ्गा तस्य जिताऽतिशुभ्रयशसा भूत्वाधिगत्यार्जुनं
नूनं जीवनमात्मनो निपतति प्राप्य ह्रियं तून्नतात् ।
शैलेन्द्रे दिननायकोऽपि विजितस्तस्य प्रतापेन किं
सायं पश्चिमवारिधौ निपतति प्राप्तत्रपो भूपतेः ॥
क्षोणीबाधानिदानप्रबलयुतमहाक्षत्रशीर्षप्रभेदे
प्राप्तो वैज्ञानिकत्वं करघृतभिदुरोद्दीप्तहेतिप्रकाण्डः ।

विख्याताश्वत्सुधर्मो गुरुमतविलसन्नीतियुक्तो बुधौघैः
संसेव्योऽतुल्यभागो विलसति जगदेकावनीनाथशक्रः ॥
शेषस्तज्जगदेकरायनृपतेः कीर्त्या जितः सत्रपः
क्ष्माभारोपधिमेत्य किन्तु सततं पाताल एव स्थितः ।
तार्तीयीकविलोचनं च विजितं तस्य प्रतापेन किं
नोन्मेषं नयते कदापि हिमवत्पुत्रीमनोवल्लभः ॥
दस्यूनङ्कुशरायभूपतिवरो जित्वा रणक्ष्मातले
दस्यूनेव महावनान्तरगतान् कृत्वा तताना‌द्भुतम् ।
विद्वद्गायकसेवकप्रततये दानाय . . . . . .
. . . . सुपर्वद्रुमः ॥
आगत्याङ्कुशरायभूपतिवरं स्वेषां प्रतीताह्वता-
मिच्छन्तः प्रविदारणाय बलिभिस्तत्सैनिकैर्निर्जिताः ।
दत्वास्मै च हयान् गजान् वसुपुरीः प्रत्यर्थिनो निर्धनाः
पूर्वामप्य(थ)निन्युरात्मनिलयामज्ञाः प्रतीताह्वताम् ॥
सर्वज्ञः स वनीपकान् वितनुते राणाङ्कुशक्ष्माविभु-
र्विद्याढ्यानवनीपकान् करुणया वित्तानवित्तानरीन् ।
स्वस्थं निर्जरनायकं स्म कुरुते भोगेन जित्वाप्यहो
अस्वस्थं नितराममुष्य महिमा ज्ञातुं कथं शक्यते ॥
यो यत्नं बहुमेकसैन्धवहतौ पार्थोऽकरोत्संयुगेऽ-
नायासेन विनिघ्नतो निजशरैः सङ्ख्याधिकान् सैन्धवान् ।
तस्यैव प्रतिमा भवेत् किममितान् दुश्शासनान्निघ्नतो
भीमश्चाङ्कुशरायभूतलपतेर्भिन्नैकदुश्शासनः ॥
संप्राप्याङ्कुशरायभूतलपतेः कीर्त्या जितत्वं भवन्
सत्रासो द्विजराजनाम नितरामिन्दुर्बिभर्ति ध्रुवम् ।
तद्वत्तस्य महाप्रतापविजितो भूत्वा कृशानुर्भृशं
मध्यं प्राप्य भयान्महाजलनिधेः किं बाडवाख्योऽभवत् ॥
कन्यामङ्कुशरायभूपतिमणिः श्रीलिङ्गमाख्यान्वितां
रम्यां वीरपनामभूपतनयां धन्यामुपायंस्त सः ।

पातिव्रत्यगुणेन किन्तु विजिता पद्मालयाधीनतां
यस्याः प्राप्तवती तदीयसदने सन्तिष्ठते सन्ततम् ॥
जागर्त्यात्मधवोक्तवाक्यकरणे चारुन्धती तत्र या
पश्यं स्व . (?) सभर्तृका इव सखीः ख्याताऽनसूयेति या ।
उक्ता बन्धुततेर्भृतिं विदधती नित्यं तया याम्बिका
तस्यास्ताश्च परा जगत्त्रयगतास्तुल्याः कथं योषितः ॥
तस्यामङ्कुशरायभूपकुलराडुत्पादयामास स-
द्धर्माढ्यं सनयं कुमारजगदेकावन्यधीशं ततः ।
शूरं चेम्माडि-अङ्कुशक्षितिपतिं सर्वज्ञताशङ्करं
गाम्भीर्यादथ नारसिंहधरणीनाथं नितान्तोज्ज्वलम् ॥
अन्यामुपायत स विट्ठलमाभिधेयां
कन्यामणिं शुभदिनेऽङ्कुशरायभूपः ।
तस्यामवाप परसत्त्वगुणं महोग्रं
सङ्ख्येषु वेङ्कटपतिक्षितिनाथवर्यम् ॥
जातो धर्मसुतः कुमारजगदेकावन्यधीशोपधिः
नो चेदिम्माडि-अङ्कुशक्षितिपतिर्युद्धे कथं भीमताम् ।
प्राप्तोऽस्यानु(म)रपुङ्गवस्तदनुजः श्रीनारसिंहप्रभु-
र्विख्यातो भुवि जिष्णुतामधिगतो बाढं सुभद्रान्वितः ॥
वर्णान् कर्मसु सङ्करेण रहितान् सर्वान् करोतीति यत्
नैतद्रामवदद्भुतं वितनुते व्याख्यातपाश्चात्यताम् ।
प्राप्तं वा त्रितयं धराश्रितविपक्षाख्यावतां कर्मणां
कुर्वन् भाति स सङ्करेण रहितं भूपाग्रणीः सन्ततम् ॥
शूरोऽयं तनुते कुमारजगदेकावन्यधीशो धरा-
नाथान् स्वस्य विपक्षतामधिगतांश्चित्रं विपक्षानपि ।
हृष्टास्तत्प्रतिपादितेन वसुना तं लब्धवर्णोत्तमं
कुर्वन्त्येव तु लब्धवर्णमधुना भूमीसुरा गायनाः ॥
प्राप्ता विश्रुततां कुमारजगदेकावन्यधीशोज्ज्वल-
त्सैन्यौघः प्रथनाह(र्य) स्म मनुते सङ्ख्यं गतं सार्थकम् ।

जित्वारीन् प्रविदारणाद्वयमदोनिष्ठं द्विषद्भूमिपा
बुध्यन्त्यस्य वरैर्निशातविशिखैर्भिन्नाङ्गका अर्थवत् ॥
कीर्त्यां तस्य जितः कुमारजगदेकावन्यधीशस्य किं
प्राप्तो हर्षविहीनतां द्विजपति . . . . सैः ।
तद्वत्तस्य महाप्रभावविजितो भूत्वा भृशं भास्करो
नायासं त्ववि(पि) नाम किन्नु भजत सत्कोशकारोदितम् ॥
स्वां पुत्रीमभिवीक्षितुं गिरिपतिः प्राप्तोऽवकाशं परं
गन्तुं रूप्यमहीधरं हरिगजः स्ववाहिनीपाथसि ।
क्रीडां सन्तनुते करोति फणिपो भाष्यस्य शोधं निजे
धात्रीमिम्मडि-अङ्कुशक्षितिपतौ दोर्मण्डले बिभ्रति ॥

गोत्राः खण्डितपक्षका मधुपसंयुक्ताः सदा दिग्गजाः
घोणीन्द्रोऽपि मृगोऽप्यधोभुवनवा(न्) शेषो महान् कच्छपः ।
प्राप्तोत्येषं जडाशयत्वमिति संप्राप्ता क्षमा भामिनी
रम्यैरिम्मडि-अङ्कुशक्षितिपतिं युक्तं गुणैर्हृष्यति ॥

शर्वात्मीयशिरोविभेदनकृते स्रष्टुः प्रतीकारवान्
धातासीदधुना ततो(धि)कतरं सर्वज्ञमस्त्रीजितम् ।
नेतारं त्वगणय्य पट्टणचयस्यानन्तभृत्यान्वितं
संसृज्येम्मडि-अङ्कुशक्षितिपतिं वैरीभसङ्घच्छिदम् ॥

अस्माकं क्षितिभारतामधिगतैर्व्यर्थाह्वयैः किं वरैः
भूपालैर्हरणाय सारसकविव्रातश्रियोऽन्विच्छतः ।
दारिद्र्याख्यगजस्य योऽङ्कुशवरो भूत्वार्थवन्नामवान्
हर्षेणेम्मडि-अङ्कुशक्षितिपतिं नित्यं वयं संस्तुमः ॥

संप्राप्तो नितरामपि त्रिभुवने या निर्निरोधं सदा
संप्राप्तुं परभूमिपालनिकरं नेच्छन्त्यवाप्तुं स्तुतान् ।
विद्वद्भिर्महितैः कलङ्करहिता सत्येव धात्र्यां तया
किं न्वस्तीम्मडि-अङ्कुशक्षितिपतेः कीर्त्या समा भामिनी ॥

सङ्ख्येष्विम्मडि-अङ्कुशक्षितिपतिः कृत्वाहितान्निर्जितान्
खेदा ान् कुरुते हितेषु विमुखान् वस्तुष्वयं चाहितान् ।

एतानप्यभियातिनामसहितान् भीत्या समालिङ्गितान्
कृत्वा चानभियातितां प्रणयते शूराग्रणीरद्भुतम् ॥
सर्वानिम्मडि-अङ्कुशक्षितिपतिर्दस्यून् गृहीत्वा बला-
त्कृत्वा सैनिकनिर्जितान् वितनुतेऽहो विग्रहं सग्रहम् ।
अन्यानप्ययमर्जुनेन सदृशः सङ्ग्रामयुक्तान् बहून्
रोषं प्राप्य नितान्तमेषु तनुते विग्राममयोगान् कथम् ॥
दि(ती)क्ष्णादिम्मडि-अङ्कुशक्षितिपतेर्निर्भिन्नवैरिप्रजा-
त्संप्राप्ताजिनिरुद्धकीर्तिरनघा या चन्द्रहासाद्रणे ।
तस्याः कैरवबान्धवं प्रहसतीत्येष प्रसिद्धो गुणै-
र्यस्तं स्वोत्तमकारणस्थगुणजं संभावयामि त्वहम् ॥
किं धातेम्मडि-अङ्कुशाह्वयमहीनाथेन विद्याव्रज-
ज्ञानेनैति यतो जितत्वमजवत्तस्मादजः कथ्यते ।
किं शेषोऽपि विनिर्जितत्वमितवानेतासु वैराग्यवान्
यस्माद्भोगपरायणोऽभवदतो भोगीन्द्र इत्युच्यते ॥
प्राहितं नरसिंहभूपतिवरस्यास्कन्दनेषूग्रतां
नामैवास्य नितान्तमाश्रितजनप्रह्लादनं . . . . ।
वात्सल्यं निजसोदरेषु पुरुषश्रैष्ठ्यं च लक्ष्मीयुतिं
स्तुत्यत्वं बुधमण्डलेन जगतीसन्त्राणविज्ञातताम् ॥
चक्र(क्रो)द्गाढप्रमोदं विदधदपि वसुं वृत्रसंहारदक्षो
वेलानिर्माणविज्ञानसमतुरगवान् धर्मसृष्टेर्निदानम् ।
छायासन्तोषकारी द्विजपतिमहितश्रीप्रदायी प्रतीता
लोके बृन्दारनार्थैः स जयति नितरां नारसिंहाख्यभानुः ॥
श्रीकान्तारमणोऽद्य वेङ्कटपतिक्ष्मानाथवर्योपधिं-
र्लोकख्यातजनार्दनाह्वयमपि त्रैविक्रमाख्यप्रथाम् ।
प्राप्तो जन्म निराचिकीर्षुरवनिस्थानां जनानां सदा
कुर्वन् गुप्तिमनन्तविक्रमचयं जित्वा च युद्धेष्वरीन् ॥
भुञ्जानोऽरिप्रमोदं कुवलयमहितामोदकर्ता द्विजेभ्यो
दानं कुर्वन्वसूनामपगम(मि(ततमाः पङ्कजन्माभियाति ।

सर्वज्ञोन्मूर्धरत्नं सततविरचितानन्तसेवः प्रमोदं
हर्तैकागारिकाणां स जयति सतिनो वेङ्कटक्ष्मापतीन्दुः ॥
एतत्स्वानुजनित्यसेवितपदद्वन्द्वस्य चावेक्षित-
स्यापि स्नेहदृशा कुमारजगदेकावन्यधीशेन्दुना ।
प्राप्तेनाग्रजतां महाभ्युदयद्वन्द्वचर्यं मदारब्धसत्-
काव्यस्येम्मडि-अङ्कुशक्षितिपतेर्वक्ष्ये कथायाः क्रमम् ॥

श्रियः पतिं द्वारवतीनगर्यां स्थितं जगद्रक्षणमादधानम् ।
समाययुर्वीक्षितुमम्बुजाक्षमुत्काः कदाचिन्मुनयोऽत्रिमुख्याः ॥
सारङ्गचर्माम्बरसंवृताङ्गांस्त्रिपुण्ड्रसंशोभितफालदेशान् ।
विभूतिलेपातिसितप्रतीकान् रुद्रानिवाश्वजटमूर्धयुक्तान् ॥

* * * *

परिवृतो विविधोपलकान्तिभिर्लसति चित्रपटान्वितवत्सदा ।
तटसमीपगतर्क्षगणेन यो निशि च सन्मणिभूषणयुक्तवत् ॥

* * * *

अस्माभिरस्य यदुवंशमणे गुहाया द्वारे महीधरवरस्य मनोहरायाः ।
कन्या प्रफुल्लकमलायतलोचनैका कुर्वत्यदर्शि विहृतिं ससखीसमूहा ॥
तां दृष्ट्वा जितपरिपूर्णचन्द्रवक्त्रां बिम्बोष्ठीं किसलय(कान्ति)मम्बुजाक्षीम् ।
आयाता कथमिममच्युतं रमेयं सन्त्यज्येत्यजानि मनस्सु संशयो नः ॥
तस्या वयस्यामणिरम्बुजाक्ष्या जगाद दृष्टाथ विलक्षतां हि ।
अस्माभिरासैश्चरतीति कन्या वन्यातले धन्यनृपस्य कस्य ॥
अस्यर्क्षवद्गिरिवरस्य गुहान्तराले रम्या पुरी वसति काप्यलकासदृक्षा ।
ऋक्षाधिपः समभिरक्षति जाम्बवांस्तामिक्ष्वाकुवंशमणिपक्षतया प्रतिद्धः ॥
प्रासावि तेन दिवसेऽतिशुभे मुनीन्द्रालोकत्रयेन्दुवदनागणमूर्धरत्नम् ।
कन्याभिरूप्यगुणविश्रमभूमिरेका जैवातृकस्य कलशाम्बुधिना कलेव ॥

* * * *

Colophon:

सञ्जातोऽङ्कुशरायभूपतिवराद्यो लिङ्गमाम्बेक्षणा-
रत्नादिम्मडि-अङ्कुशक्षितिपतिस्तस्यात्र विद्वन्मणेः ।

काव्ये जाम्बवतीविवाहमहिताख्यासंयुते सद्गुण(णे)
सर्गोऽयं नि(रगान्वितान्त)विनुतो लोकैर्द्वितीयो महान् ॥

End:

इत्युक्त्वाभ्रं प्राविशद् द्वादशात्मा भूपालोऽपि स्वेष्टसिद्धेः प्रहृष्टः ।
नत्वाथर्षींस्तत्कृतान् प्राप्य चाशीर्वादान् गन्तुं द्वारकां काङ्क्षते स्म ॥

Colophon:

सञ्जातोऽङ्कुशरायभूपतिवराद्यो लिङ्गमाम्बेक्षणा-
रत्नादिम्मडि-अङ्कुशक्षितिपतिस्तस्यात्र विद्वन्मणेः ।
काव्ये जाम्बवतीविवाहमहिताख्यासंयुते सद्गुणः
सर्गोऽयं निरगान्वितान्तविनुतो लोकैस्तुरीयो महान् ॥
महाप्रतापेम्मडि अङ्कुशावनि(नी)पते हरिप्रेषितदूतवाक्क्रमम् ।
प्रतिक्षितीन्द्रं मृगयां वनान्तरे कृतं प्रसेनेन च सादरं शृणु ॥

* * * *

अनन्यलभ्यामितमाल्यवस्तुनो जगाद भूपालकरिक्थतां स्मृतिः ।
तदुग्रसेनाय महीश्वराय नस्त्वया प्रदेयोऽग्र्यमणिः स्यमन्तकः ॥
अनादृतं स्याद्यदि धर्मदर्शनं भवादृशेनाखिलधर्मवेदिना ।
महीश्वरान्येन विलङ्घितं भवेन्नरेण तत्साधु विचारयात्मनि ॥
इदम्.

No. 11536. धर्मशर्माभ्युदयः.
DHARMAŚARMĀBHYUDAYAḤ.

Substance, palm-leaf (Śrītāla). Size, 9½ × 2½ inches. Pages, 341. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, old.

A poem in 21 Sargas by Haricandra, son of Ārdradēva of the Kāyastha community and Rathyā. Dharma Śarman or Dharmanātha, the hero of the poem, is the fifteenth of the twenty-four Tīrthaṅkaras held in esteem by the Jainas; and his birth and the chief incidents of his life up to his attaining the Nirvāṇa or salvation are described herein. The hero was born as the son of Mahāsēna of the Ikṣvāku family and king of Ratnapura by his wife Suvratā. The work has been printed in the Kāvyamālā.

Complete.

Beginning :

श्रीनाभिसूनोश्चिरमङ्घ्रियुग्मनखेन्दवः कौ मुदमेधयन्तु ।
यत्रानमन्नाकिनरेन्द्रचक्रचूडाश्मगर्भप्रतिबिम्बमेणः ॥ १ ॥
चन्द्रप्रभं नौमि यदीयभासा नूनं जिता चान्द्रमसी प्रभा सा ।
नो चेत् कथं तर्हि तदङ्घ्रिलग्नं नखच्छलादिन्दुकुटुम्बमासीत् ॥ २ ॥
दुरक्षरक्षोदधियेव धात्र्यां मुहुर्मुहुर्घृष्टललाटपट्टाः ।
यं स्वर्गिणोऽनल्पगुणं प्रणेमुस्तनोतु नः शर्म स धर्मनाथः ॥ ३ ॥

* * * *

तत्रास्ति तद्रत्नपुरं पुरं यद्द्वारस्थलीतोरणवेदिमध्यम् ।
अलङ्करोत्यर्कतुरङ्गपङ्क्तिः कदाचिदिन्दीवरमालिकेव ॥
मुक्तामया एव जनाः समस्तास्तास्ताः स्त्रियो या नवपुष्परागाः ।
वज्रं द्विषां मूर्ध्नि नृपोऽपि यस्य वितन्वते नाम विनिश्चितार्थम् ॥

* * * *

Colophon :

इति महाकविश्रीहरिचन्द्रविरचिते धर्मशर्माभ्युदये नगरवर्णनं नाम प्रथमः सर्गः ॥

End :

इत्याश्वास्य चतुर्विधेन महता सङ्घेन संभूषितः
सैन्येनेव विपक्षवादिवदनाक्रष्टामशेषां महीम् ।
दृप्यन्मोहचमू विजित्य विजयस्तम्भायमानं तदा
संमेदाचलमाससाद विजयश्रीधर्मनाथः प्रभुः ॥
तत्रासाद्य सितांशुयोगसुभगां चैत्रे चतुर्थीं तिथिं
यामिन्यां स नवोत्तरैर्यमवतां साकं शतैरष्टभिः ।
सार्धद्वादशवर्षलक्षपरमारभ्यायुषः प्रक्षये
ध्यानध्वस्तसमस्तकर्मनिगलो जातस्तदानीं क्षणात् ॥
अभजदथ विचित्रैर्नाकप्रसूनप्रचारैः
प्रभुरिह हरिचन्द्राराधितो मोक्षलक्ष्मीम् ।
तदनु तदनुयायी प्राप्तपर्यन्तपूजो-
पचितसुकृतराशिः स्वं पदं नाकिलोकः ॥
श्रीमानमेयमहिमास्ति स नेमधानां
वंशः समस्तजगतीवलयावतंसः ।

हस्तावलम्बनमवाप्य यमुल्लसन्ती
वृद्धापि न स्खलति दुर्गपथेषु लक्ष्मीः ॥
मुक्ताफलस्थितिरलङ्कृतिषु प्रसिद्ध-
स्तत्रार्द्रदेव इति निर्मलमूर्तिरासीत् ।
कायस्थ एव निरवद्यगुणग्रहः स-
न्नेकोऽपि यः कुलमशेषमलंचकार ॥
लावण्याम्बुनिधिः कलाकुलगृहं सौभाग्यसद्भाग्ययोः
क्रीडावेश्म विलासवासवलभी भूषास्पदं संपदाम् ।
शौचाचारविवेकविस्मयमही प्राणप्रिया शूलिनः
शर्वाणीव पतिव्रता प्रणयिनी रथ्येति तस्याभवत् ॥
अर्हत्पदाम्भोरुहचञ्चरीकस्तयोः सुतः श्रीहरिचन्द्र आसीत् ।
गुरुप्रसादादमला बभूवुः सारस्वतस्रोतसि तस्य वाचः ॥
(भक्तेन शक्ते)न च लक्ष्मणेन निर्व्याकुलो राम इवानुजेन ।
यः पारमासादितबुद्धिसेतुः शास्त्राम्बुराशेः परमाससाद ॥
पदार्थवैचित्र्यरहस्यसंपत्सर्वस्वनिर्वेश्य(शमयात्प्रसादात्) ।
(वाग्देवतायाः समवेदि सम्यैर्यः) पश्चिमोऽपि प्रथमस्तनूजः ॥
स्व(स)कर्णपीयूषरसप्रवाहं सर(रस)ध्वनेरध्वनि सार्थवाहः ।
श्रीधर्मशर्माभ्युदयाभिधानं महाकविः काव्यमिदं व्यद(ध)त्त ॥
ये(ए)ष्यत्यसारमपि काव्यमिदं मदीय-
मादेयतां जिनपतेरनघैश्चरित्रैः ।
पिण्डं मृदः स्वयमुदस्य नरा नरेन्द्र-
मुद्राङ्कितं किमु न मूर्धनि धारयन्ति ॥
दक्षैः साधु परीक्षितं नवनवोल्लेखार्पणेनादरा-
द्यच्चेतःकषपट्टिकासु शतशः प्राद(प्त)प्रकर्षोत्स्मनम् ।
नानाभङ्गिविचित्रभावघटनासौभाग्यशोभास्पदं
तन्नः काव्यसुवर्णमस्तु कृतिनां कर्णद्वयीभूषणम् ॥
जीयाज्जनामिदं मतं शमयत्(तु) क्रूरानपीयं कृपा
भारत्या (सह) शीलयत्वमि(वि)रतं श्रीः साहचर्यव्रतम् ।

मात्सर्यं गुणिषु त्यजन्तु पिशुनाः सन्तोषलीलाजुषः
सन्तः सन्तु भवन्तु च श्रमविदः सर्वे कवीनां जनाः ॥

Colophon :

इति महाकविश्रीहरिचन्द्रविरचिते धर्मशर्माभ्युदये महाकाव्ये श्रीधर्मनाथनिर्वाणगमनो नाम एकविंशतितमः सर्गः ॥

The scribe adds—

आनन्दवत्सरे मासि ज्येष्ठे प्रथमपक्षके ।
दशम्यां शुभलग्ने च चारुकीर्तियतीशिनाम् ॥

No. **11537.** धर्मशर्माभ्युदयः.

DHARMAŚARMĀBHYUDAYAḤ.

Substance, palm-leaf (Śrītāla). Size, 9¾ × 1¼ inches. Pages, 339. Lines, 6 on a page. Character, Kanarese. Condition, much injured. Appearance, old.

Complete.

Same work as the above.

This work is said to have been copied on the 11th day of the bright fortnight in Śaka 1618, the cyclic year given herein being illegible on account of lacunæ.

No. **11538.** धातुकाव्यम्, कृष्णार्पणव्याख्यासहितम्.

DHĀTUKĀVYAM WITH THE COMMENTARY KṚṢṆĀRPAṆA.

Substance, paper. Size, 10⅞ × 8⅜ inches. Pages, 228. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

This poem in three Sargas is stated to have been composed with a view to supplement the story of Vāsudēva or Kṛṣṇa dealt with in the Vāsudēvavijaya of Vāsudēvakavi, a Brahmin resident of Puruvana village in the Kērala country (the modern Malabar, Cochin and Travancore). The poem treats of the destruction of Kaṁsa by Kṛṣṇa and describes the three chief incidents leading to this result. The poem, like its model, illustrates the various forms of the Sanskrit verbal roots taken from Bhīmasēna's Dhātupāṭha and Mādhava's work (Dhātuvṛtti). The first Sarga treats of roots from the भ्वादि to स्वादि, the second deals with those of तुदादि and the third with those from रुधादि to चुरादि.

Beginning:

स्मरत हरेर्मधुरतमं मुरलीनिनदामृतं हि शब्दमयम् ।
पदयुगलं च तदस्या महिषारेर्मुक्तिनिलयवासिन्याः ॥
गुरुपादाब्जसंसेवानितान्तविमलाशयैः ।
सतीर्थ्यैरद्य लिख्यन्ते धातुकाव्यार्थलोचना(ः) ॥

अथ वासुदेवकविविरचितस्य काव्यरत्नस्य शेषपरिपूरणाय चिकीर्षितं प्रतिजानीते—

उदाहृतं पाणिनिसूत्रमण्डलं प्राग्वासुदेवेन तदूर्ध्वतोऽपरः ।
उदाहरत्यद्य वृकोदरोदितान् धातून् क्रमेणैव हि माधवाश्रयात् ॥

अद्य अपरः तदूर्ध्वतः धातूनुदाहरतीत्यन्वयः । वासुदेवो नाम केरलेषु पुरुवनग्रामजन्मा कश्चित् द्विजन्मा । पाणिनेः सूत्राणि पाणिनिसूत्राणि, तेषां मण्डलं समूहः । उदाहृतम् उदाहरणैः प्रकाशीकृतम् । अपर इत्यौद्धत्यपरिहाराय नामानुक्तिः । तदूर्ध्वत इति सप्तम्यर्थे तसिः । तस्य सूत्रोदाहृतस्योर्ध्वभागे धातूनुदाहरतीत्यर्थः । अन्योदाहरणकाव्येषु क्वचिदप्यदृष्टमिहातिशयं प्रतिपादयति क्रमेणैव ।

* * * *

कंसहिंसा प्रबन्धार्थो वीरभक्त्यादयो रसाः ।
त्रिभिर्दिनैः कृतं कर्म त्रिभिः सर्गैश्च कथ्यते ॥
अक्रूरयोगो यात्रादिचापच्छेदान्तचेष्टितम् ।
मल्लाद्योगादिकं सान्तपर्यन्तं च त्र्यहे कृतम् ॥
धातुपाठे च भूवादिर्भूयान् भवति तत्र च ।
अगणैः प्रथमो भागो जुताद्यो गणवान् परः ॥
अनयोरगणो भागः प्रथमे सर्ग उच्यते ।
द्वितीयभागमारभ्य तुदाद्यन्तं द्वितीयके ॥
रुधादितश्चुराद्यन्तं तृतीयेनोपवर्ण्यते ।
व्यज्यते गणभेदादिः कथाभेदादिलाञ्छनैः ॥
तात्पर्यभेदाद्योज्यन्ते तुल्यार्था अपि धातवः ।

अथैवम्भूतं काव्यमारभते—

स गान्दिनीभूरथ गोकुलैधितं स्पर्धालुधर्गाधितकार्यबाधिनम् ।
द्रक्ष्यन् हरिं नाथितलोकनाथकं दैधे मुदा स्कुन्दितमन्तरिन्द्रियम् ॥

अथ सः गान्दिनीभूः हरिं द्रक्ष्यन् अन्तरिन्द्रियं मुदा स्कुन्दितं देधे । अर्थ श्रीकृष्णानयनार्थं कंसनियोगानन्तरं सः तत्तादृशभगवद्भक्तिशाली गान्दिनीतो भवत्युत्पद्यत इति गान्दिनीभूरक्रूरः ।

End:

खला विपुत्कुकुरवद्भयार्ता ययुश्च संभाण्डयमानभृत्याः ।
भयेन सञ्चीवरिताः स्थिता ये ते तु प्रहृष्टा नगरं प्रविष्टाः ॥

इति । विपुच्छाः कुकुरा इव अधःकृतपुच्छाः श्वान इव भयार्ताः खलाः संभाण्डयमानभृत्याः समाचयमानाः उद्धार्यवस्तून्येकीकृत्य बध्नन्तो भृत्या येषां ते तथाभूताः सन्तो ययुः । ये सज्जनाः भयेन सञ्चीवरिताः चीवरमार्जितवन्तः परिहितवन्तो वा पूर्वं स्थिताः ते तु प्रहृष्टाः नगरं मधुरापुरीं प्रविष्टाः । विपुदिति पुच्छादिषु धात्वर्थं इत्येव सिद्धम् । पुच्छभाण्डचीवराण्णिङिति न वक्तव्यम् । प्रातिपदिकाद्धात्वर्थं इत्येव णिच्सिद्धेः, बहुलोक्त्या आत्मनेपदसिद्धेश्च । तत्र पुच्छादुदसने वेति णिङि ततः क्विप् चेति क्विप् । पुतं छादयतीति व्युत्पत्त्या पुच्छशब्दस्य संयोगान्तलोपे तकारशेषात् विपुदिति स्यात् । संभाण्डयमानेति । भाण्डात् समाचयन इति णिङि शानच् । सञ्चीवरितेति । चीवरादार्जने परिधाने वेति कर्तरि क्तः ॥

Colophon:

इति श्रीकृष्णार्पणनाम्नि धातुकाव्यव्याख्याने तृतीयः सर्गः ॥
निहत्य कंसं मधुरानगर्यां निवेश्य राजानमथोग्रसेनम् ।
संप्रेष्य नन्दं विजहार कृष्णस्तत्रैव रामेण सहात्मगेहे ॥

No. 11539. नटेशविजयः.

NAṬEŚAVIJAYAḤ.

Substance, palm-leaf. Size, $14\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 77. Lines, 7 on a page. Character, Grantha. Condition, fair. Appearance, old. Complete.

Contains the Sargas one to six, the sixth containing 1 to 67 stanzas. A Telugu commentary giving the word for word meaning and also the gist of the stanzas is added to the text.

No. 11786. शिशुपालवधव्याख्या—सर्वङ्कषा.
ŚIŚUPĀLAVADHAVYĀKHYĀ : SARVAṄKAṢĀ.

Pages, 115. Lines, 9 on a page.

Begins on fol. 13a of the MS. described under No. 11701.

Contains the Sargas 18 to 20 which last is almost complete.

Same work as that described under No. 11770 wherein see for the beginning.

End:

उपेन्द्रस्येदम् औपेन्द्रं वपुः हरेर्विग्रहं विशत् प्रविशत धाम विस्मिताक्षैः विकासित(नयनैः नरे)न्द्रैः राजन्यैः वीक्षांबभूवे ईक्षितम् । ईक्षतेः कर्मणि लिट् । इजादेरित्याम्प्रत्ययः । कृन्दत्रच(श्चानु)प्रयुज्यते लिट्(टी)ति भुवोऽ(नुप्रयोगः) । (भावकर्मणो) रित्यात्मनेपदम् । अत्र भगवान् व्यासः—

ततश्चेदिपते(र्देहात्ते)जोऽग्र्यं ददृशे नृपः ।
तद्व्याशपथा(उत्पपात यदा)रा . . . .

No. 11787. शिशुपालवधव्याख्या—सर्वङ्कषा.
ŚIŚUPĀLAVADHAVYĀKHYĀ : SARVAṄKAṢĀ.

Pages, 86. Lines, 7 on a page.

Begins on fol 9a of the MS. described under No 11733.

Contains 67 stanzas in the 4th Sarga, 9 stanzas in the 9th Sarga and 11th Sarga complete.

Same work as the above

No. 11788. शिशुपालवधव्याख्या—सर्वङ्कषा.
ŚIŚUPĀLAVADHAVYĀKHYĀ : SARVAṄKAṢĀ.

Pages, 79. Lines, 7 on a page.

Begins on fol. 1a of the MS. described under No. 11734.

Contains the Sargas 12 and 6.

Same work as the above

No. 11789. शिशुपालवधव्याख्या—सर्वङ्कषा.
ŚIŚUPĀLAVADHAVYĀKHYĀ: SARVAṄKAṢĀ.

Pages, 149. Lines, 8 on a page.

Begins on foll. 181a, 204a, 227a, 244a and 255b of the MS. described under No. 11477 wherein this work has been omitted to be mentioned in the list of other works given therein.

Contains the Sargas one to five complete.

Same work as the above.

The commentary of the first Sarga is said to have been copied by Viñjimūri Subbaṇṇa, the copying having been completed on Tuesday, the 2nd day of the dark fortnight of the Kārttikai month in the year Piṅgala.

At the end of the fifth Sarga it is stated that the copying was completed by the same scribe on Sunday, the 8th day of the dark fortnight of the Mārgaśira month in the year Kālayukti.

No. 11790. शिशुपालवधव्याख्या—सर्वङ्कषा.

ŚIŚUPĀLAVADHAVYĀKHYĀ : SARVAṄKAṢĀ.

Substance, paper. Size, $8\frac{7}{8} \times 5\frac{1}{2}$ inches. Pages, 43. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the fourth Sarga complete.

Same work as the above.

No. 11791. शिशुपालवधव्याख्या—सर्वङ्कषा.

ŚIŚUPĀLAVADHAVYĀKHYĀ : SARVAṄKAṢĀ.

Pages, 8. Lines, 11 on a page.

Begins on fol. 4*a* of the MS. described under No. 11585.

Contains 19 stanzas of the fourth Sarga.

Same work as the above.

No. 11792. शिशुपालवधव्याख्या—सर्वङ्कषा.

ŚIŚUPĀLAVADHAVYĀKHYĀ : SARVAṄKAṢĀ.

Substance, palm-leaf. Size, $16 \times 1\frac{1}{4}$ inches. Pages, 20. Lines, 14 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains the first Sarga only.

Same work as the above.

No. 11793. शिशुपालवधव्याख्या—सर्वङ्कषा.

ŚIŚUPĀLAVADHAVYĀKHYĀ : SARVAṄKAṢĀ.

Substance, palm-leaf. Size, $15\frac{7}{8} \times 1\frac{5}{8}$ inches. Pages, 40. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is Āśīrvādaślōka with commentary 21*a*.

Contains the second Sarga complete, but without colophon.

Same work as the above.

No. 11794. शिशुपालवधव्याख्या—सर्वङ्कषा.

ŚIŚUPĀLAVADHAVYĀKHYĀ : SARVAṄKAṢĀ.

Substance, palm-leaf. Size, 14⅞ × 1⅜ inches. Pages, 93. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, fair.

Contains the sixth Sarga complete.

Same work as the above.

No. 11795. शिशुपालवधपदान्वयः.

ŚIŚUPĀLAVADHAPADĀNVAYAḤ.

Substance, palm-leaf. Size, 10 × 1⅜ inches. Pages, 100. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, new.

Contains the prose order of all the stanzas in the fourth Sarga, of 79 stanzas in the sixth Sarga and of all the stanzas in the 11th Sarga.

No. 11796. शिशुपालवधव्याख्या—सर्वङ्कषा.

ŚIŚUPĀLAVADHAVYĀKHYĀ: SARVAṄKAṢĀ.

Substance, palm-leaf. Size, 11⅞ × 1¼ inches. Pages, 233. Lines, 5 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Contains the Sargas one to three.

Same work as that described under No. 11794.

No. 11797. शिशुपालवधव्याख्या—सर्वङ्कषा.

ŚIŚUPĀLAVADHAVYĀKHYĀ : SARVAṄKAṢĀ.

Substance, palm-leaf. Size, 15 × 1¼ and 16¼ × 1¼ inches. Pages, 60. Lines, 5 on a page. Character, Grantha. Condition, much injured. Appearance, new and old.

Contains the Sargas eight and nine. Wants a few lines in the beginning of the eighth and three stanzas in the beginning of the ninth Sarga.

Same work as the above.

No. 11798. शिशुपालवधव्याख्या—सर्वङ्कषा.

ŚIŚUPĀLAVADHAVYĀKHYĀ : SARVAṄKAṢĀ.

Substance, palm-leaf. Size, 15⅜ × 1¼ inches. Pages, 90. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Contains the 19th Sarga complete.

Same work as the above.

The book is said to have belonged to Raṅgācārya of Lakṣmīnārāyaṇapura and a relation of Śrīnivāsa, son of Kavitārkikasiṁha.

No. 11799. शिशुपालवधव्याख्या—सर्वङ्कषा.

ŚIŚUPĀLAVADHAVYĀKHYĀ : SARVAṄKAṢĀ.

Pages, 66. Lines, 5 on a page.

Begins on fol. 49*a* of the MS. described under No. 11750.

Contains 40 stanzas in the first Sarga.

Same work as the above.

No. 11800. शिशुपालवधव्याख्या—सर्वङ्कषा.

ŚIŚUPĀLAVADHAVYĀKHYĀ : SARVAṄKAṢĀ.

Substance, palm-leaf. Size, 15⅛ × 1¼ inches. Pages, 30. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the seventh Sarga complete.

Same work as the above.

No. 11801. शिशुपालवधव्याख्या—सर्वङ्कषा.

ŚIŚUPĀLAVADHAVYĀKHYĀ : SARVAṄKAṢĀ.

Pages, 34. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 11735.

Contains the eighth Sarga.

Same work as the above.

No. 11802. शिशुपालवधव्याख्या—सर्वङ्कषा.

ŚIŚUPĀLAVADHAVYĀKHYĀ : SARVAṄKAṢĀ.

Substance, palm-leaf. Size, 15 × 1¼ inches. Pages, 235. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Contains the Sargas 15 to 19 complete, but wants a few lines in the beginning of the 15th Sarga.

Same work as the above.

No. 11803. शिशुपालवधव्याख्या—सर्वङ्कषा.

ŚIŚUPĀLAVADHAVYĀKHYĀ : SARVAṄKAṢĀ.

Pages, 41. Lines, 5 on a page.

Begins on fol. 43*a* of the MS. described under No. 11662.

Contains the 11th Sarga.

Same work as the above.

No. 11804. शिशुपालवधव्याख्या—सर्वङ्कषा.

ŚIŚUPĀLAVADHAVYĀKHYĀ : SARVAṄKAṢĀ.

Substance, palm-leaf. Size, 19 × 1¼ inches. Pages, 58. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is Nigamāntāryacarita 30*a*.

Contains the tenth Sarga and ten stanzas of the seventh Sarga.

Same work as the above.

No 11805. शिशुपालवधव्याख्या—सर्वङ्कषा.

ŚIŚUPĀLAVADHAVYĀKHYĀ : SARVAṄKAṢĀ.

Pages, 145. Lines, 6 on a page.

Begins on fol. 25*a* of the MS. described under No. 11743.

Contains the first Sarga (from the 19th stanza to the end) and the second Sarga (1 to 90 stanzas).

Same work as the above.

Said to have been copied by one who calls himself Ēnagiri Upādhyāya.

No. 11806. शिशुपालवधव्याख्या—सर्वङ्कषा.

ŚIŚUPĀLAVADHAVYĀKHYĀ : SARVAṄKAṢĀ.

Pages, 50. Lines, 8 on a page.

Begins on fol. 9*a* of the MS. described under No. 11744.

Contains the second Sarga complete.

Same work as the above.

No. 11807. शिशुपालवधव्याख्या—सर्वङ्कषा.

ŚIŚUPĀLAVADHAVYĀKHYĀ : SARVAṄKAṢĀ.

Substance, palm-leaf. Size, 16 × 1 inches. Pages, 200. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Contains the Sargas one, three, four complete and five (3 to 19, 21, 25 and 31 to 36 stanzas).

Same work as the above.

No. 11808. शिशुपालवधव्याख्या—सर्वङ्कषा.

ŚIŚUPĀLAVADHAVYĀKHYĀ : SARVAṄKAṢĀ.

Pages, 107. Lines, 6 on a page.

Begins on fol. 47*a* of the MS. described under No. 11741.

Contains the Sargas one and two complete and 33 stanzas in the third Sarga.

Same work as the above.

No. 11809. शिशुपालवधव्याख्या—सर्वङ्कषा.

ŚIŚUPĀLAVADHAVYĀKHYĀ : SARVAṄKAṢĀ.

Pages, 28. Lines, 7 on a page.

Begins on fol. 11*a* of the MS. described unedr No. 11740.

Contains the fourth Sarga.

Same work as the above.

No. 11810. शिशुपालवधव्याख्या—सर्वङ्कषा.

ŚIŚUPĀLAVADHAVYĀKHYĀ : SARVAṄKAṢĀ.

Pages, 40. Lines, 7 on a page.

Begins on fol. 5*a* of the MS. described under No. 11742.

Contains 82 stanzas in the second Sarga.

Same work as the above.

No. 11811. शिशुपालवधव्याख्या—सर्वङ्कषा.

ŚIŚUPĀLAVADHAVYĀKHYĀ : SARVAṄKAṢĀ.

Pages, 22. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 3016.

Contains 1 to 56 stanzas in the sixth Sarga.

Same work as the above.

No. 11812. शिशुपालवधव्याख्यानम्—सारसङ्ग्रहणम्.

ŚIŚUPĀLAVADHAVYĀKHYĀNAM : SĀRASAṄGRAHAṆAM.

Snbstance, palm-leaf (Śrītāla). Size, 10½ × 2 inches. Pages, 184. Lines, 10 on a page. Character, Malayāḷam. Condition, injured. Appearance, old.

Contains the Sargas one to three complete and three stanzas in the fourth Sarga.

This is a commentary on the Śiśupālavadha by Dēvarāja, son of Dvaipāyanabhaṭṭa. The author states that he consulted the commentaries of Haridāsa, Vallabha, Śrīraṅgadēva, etc.

Beginning:

यस्य लक्ष्मीभुजाश्लेषे कण्ठे कङ्कणराजयः ।
मणिमाला इवाभान्ति स वः पायाज्जनार्दनः ॥

श्रीदेवराजविदुषा शिशुपालवधाभिधे ।
काव्ये करिष्यते टीका नातिसङ्क्षिप्तविस्तरम् ॥
आलोच्य माघकाव्यस्य व्याख्यानानि बहून्यलम् ।
तत्तद्व्याख्यागता अर्था लिख्यन्ते केवलं यथा (मया) ॥
हरिदासात्तु तात्पर्यं वल्लभात्पदनिर्णयम् ।
ज्ञात्वा श्रीरङ्गदेवाद्याद्यत्सारं तच्च लिख्यते ॥
अतोऽनेन कृतो ग्रन्थ इति खण्डनतत्परः ।
मा स यासीज्जनः खेदं मा च भाविष्ट दूषणम् ॥
वाक्यार्थान्वयतात्पर्यसमासपदनिर्णयाः ।
अत्र सा देवराजीयव्याख्या विजयते भुवि ॥

प्रारिप्सितग्रन्थपरिसमाप्तिप्रत्यूहप्रशमाय प्रथमं मङ्गलाचरणं कर्तव्यमिति स्मरणात् श्रीशब्दं प्रयुञ्जानः श्रीपतिचरितोच्चारणमेव प्रयोजनभूतपरमपुरुषार्थश्च भविष्यतीति कविस्तत् परामृशति—श्रिय इत्यादि । हरिः हिरण्यगर्भाङ्गभुवं मुनिं ददर्श इति । को हरिः । श्रियःपतिः लक्ष्मीनाथो विष्णुः । स कीदृशः । जगन्निवासः जगतां भुवनानामावासः आश्रयो रक्षकः । अतश्च जगच्छासितुं श्रीमति वसुदेवसद्मनि जगन्निवासत्वादेव वसुदेवभवने वासस्य जगच्छासनं प्रयोजनमुच्यते । एतेन कर्माधीनजननत्वं भगवतो निरस्तम् ॥

Colophon :

इति श्रीमद्द्वैपायनभट्टसूनुना देवराजाचार्येण विरचिते सारसङ्ग्रहणाह्वये माघव्याख्याने तृतीयः सर्गः ॥

End :

कान्तमिति । नवप्रभाजालभृतां मनोहरदीप्तिपुञ्जधारिणां मणीनां काञ्चनवप्रभाजा सुवर्णतटसेविन्या ।

No. **11813**. शिशुपालवधः, सव्याख्यः.

ŚIŚUPĀLAVADHAḤ WITH COMMENTARY.

Substance, paper. Size, 13⅜ × 5⅜ inches. Pages, 300. Lines, 14 on a page. Character, Dēvanāgarī. Condition, injured. Appearance, new.

Contains the 12 Sargas complete and the first stanza of the 13th Sarga. This commentary is called Arthadīpikā and was composed by Haridāsa, son of Viṣṇudāsa and Mūlādēvī. Viṣṇudāsa is said to have been proficient in astronomy and astrology and was the son of Saktūmiśra who is said to have appeased God Viṣṇu at Murārinagara. Saktūmiśra was the son of Jyēṣṭha of the Rudra family and of Kāśyapagōtra and a resident of Labhapura. Haridāsa quotes Kāvyadarpaṇa.

Beginning :

वन्दे मदनगोपालं विद्यातत्त्वार्थदायकम् ।
सर्वविघ्नापहर्तारं दातारं सर्वसम्पदाम् ॥ १ ॥
आसील्लाभपुराभिधाननगरे रुद्रान्वयी काश्यपो
ज्येष्ठः सर्वकलाकलापविदुषां ज्येष्ठाभिधानो द्विजः ।
आराद्धत्रिपुरापुरारिचरणाम्भोजप्रसादोल्लस-
त्सम्पत्प्रीति(णि)तभूसुरः सुरपतिस्पर्धासमिद्धादरः । २ ॥
तस्याभूत्तनयः प्रभूतविनयः सद्धर्मकर्मप्रियः
सक्तूमिश्र इति प्रसिद्धमहिमा भक्तौ प्रसक्तः सताम् ॥
येनाराधि पुरा मुरारिनगरे विष्णुः सहृष्टं चिरा-
द्येन प्राप स विश्वभूषणमणिं श्रीविष्णुदासं सुतम् ॥ ३ ॥
वेदाचारपु(प)रः पुराणचतुरः सत्सम्प्रदायाग्रणीः
शश्वद्ब्राह्मणदेवसेवनरतः प्राप्तातिथेयप्रथः ॥
ज्योतिश्चक्रविचारबन्धुरमतिः कालज्ञचूडामणिः
सर्वोर्वीशकिरीटकोटिकषणोन्मीलन्नखेन्दुद्युतिः ॥ ४ ॥
तस्यात्मजो हरिहरार्चनलब्धबुद्धि-
र्विद्याविनोदमुदितो हरिदासमिश्रः ।
प्रासूत यं सुचरिता किल मूलदेवी
द्वैपायनाख्यमिव सत्यवती मुनीन्द्रम् ॥ ५ ॥
विष्णुदासतनूजेन हरिदासेन धीमता ।
विरच्यते यथाबुद्धि माघकाव्यार्थदीपिका ॥ ६ ॥
निरूप्य लिखितं सत्यं सज्जनैः सुविचारितम् ।
नमस्कुर्मः खला युष्मांस्तूष्णीमत्र करिष्यथ ॥ ७ ॥
योऽमूं टीकां समालोक्य स्वपाण्डित्यसमीहया ।
मन्नामाच्छादनं कुर्यात्सन्ततिस्तस्य नङ्क्ष्यति ॥ ८ ॥
" सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम् ।
आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम् ॥ "

इति काव्यदर्पणोक्तत्वादवश्यं त्रिष्वेकेन भवितव्यमित्यत्र काव्यकर्ता वस्तु-निर्देशमुद्दिष्टवान् । सदाश्रयस्य श्रीकृष्णस्य सङ्कीर्तनाशयमधिकृत्य काव्यं

प्रवर्तते । तन्निर्देशो वस्तुनिर्देश इति विघ्नविघाताय कृतं मङ्गलमादौ निबध्नन् शिष्यावधानार्थमारभते —श्रियःपतिरिति । हरिः कृष्णः । मुनिं ददर्श अद्राक्षीत् । कथम्भूतो हरिः । श्रियो लक्ष्म्याः पतिः भर्ता कृष्ण इत्यर्थः । कथम्भूतं मुनिम् । हिरण्यगर्भाङ्गभुवम् । हिरण्यं गर्भोऽस्यासौ हिरण्यगर्भो ब्रह्मा । तस्य अङ्गभूः पुत्रस्तं नारदमित्यर्थः ॥

* * * *

यं प्रासूत स विष्णुदासविबुधः श्रीमूलदेव्या सुतं
भक्त्याराधितसद्गुरुश्चिरतरं शास्त्राणि योऽधीतवान् ।
तेन च्छात्रहितेच्छुना विरचिते माघार्थसन्दीपने
सर्गः स्वर्गसुखाब्धिसर्गमधुरः पूर्णोऽयमाद्योऽभवत् ॥

Colophon :

इति श्रीमन्महोद(दा)रान्तःकरणविष्णुभक्तसर्वज्ञचूडामणिश्रीमिश्रविष्णुदासात्मजसर्वविद्याविशारदश्रीमिश्रहरिदासविरचितायां शिशुपालवधमहाकाव्यटीकायां प्रथमः सर्गः ॥

End :

अद्य नदीमित्यादिकां यमुनामतीतमेव अशृणोदिति कथमुच्यत इत्याक्षेपालङ्कारः । तपसः तनूजः प्रत्यहं यमुनामतीतं सन्तमधुनैव शुश्रुवानिति वचनावसरः । नृपतेरित्यत्र सामीप्ये षष्ठी । अस्मिन् सर्गे मञ्जुभाषिणी वृत्तम् । चतुर्थसर्गे सूत्रमुक्तम् ।

No. 11814. शिशुपालवधव्याख्या.

ŚIŚUPĀLAVADHAVYĀKHYĀ.

Substance, palm-leaf. Size, 18 × 1¼ inches. Pages, 374. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Breaks off in the 12th Sarga.

This commentary is said to have been written by Śrīraṅgadēva.

Beginning :

. . . . पुरन्दरसुरासुरमौलिशायि कुन्त्या(धिरोहिमकरन्दनिपानवाहि ।)
(मन्दारसुन्दरितलोक . . निरासि पादारविन्दमरविन्दविलोचनस्य ॥)

* * * *

पायादपुर्गिरिसुताघटितार्धभागं शर्वस्य सर्वजगताभ्रमयप्रदं वः ॥

* * * *

वासस्थानभूतः । तथापि जगच्छासितुम् । श्रीमति महाविभवे । वसुदेवसद्मनि

* * * *

Colophon :

इत्थं नवमसर्गस्य माघकाव्येऽभिधीयये (ते) ।
व्याख्या श्रीरङ्गदेवेन गूढार्थपदबोधिनी ॥

* * * *

इति श्रीरङ्गदेवाख्यो माघकाव्ये द्विजोत्तमः ।
स्पष्टं व्याचष्ट दशमं सर्गं . . . माश्रितः ॥

* * * *

इत्येकादशसर्गस्य माघकाव्ये द्विजन्मना ।
श्रीरङ्गदेवे(व)नाम्नादो व्याख्यानं निरमीयत ॥

End :

गण्डो—सुखं प्रासुमनाः सुखेन गन्तुमिच्छुः कश्चित् सुसारथिः उज्ज्वलो यन्ता उज्ज्वलनाभिश्च या नाभिः चक्रस्य पिण्डकाचक्रम्, उज्ज्वलनाभिर्यया भवति, तया नवया अचिरनिर्मितया उदग्रश्रिया अराः चक्रावयवाः तेषु श्रीः शोभा तद्युतया तया विराजमानाम् । गण्डोज्ज्वलाम् । गण्डो रथावयवविशेषः । तेनोज्ज्वलाम् । अविधुरामव्याकुलगमनाम् । रथीं शकटम् । युयोज सज्जितामकरोत् ॥

No. 11815. शौरिकथोदयः, तत्त्वप्रकाशिकाव्याख्यासहितः.

ŚAURIKATHŌDAYAḤ WITH THE COMMENTARY TATTVAPRAKĀŚIKĀ.

Substance, paper. Size, 10¾ × 8⅝ inches. Pages, 373. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

A Yamaka poem by Vāsudēva dealing with the incidents from the birth of Kṛṣṇa down to the conquest of Bāṇāsura as based on the Harivaṁśa.

The author of the commentary is Nīlakaṇṭha, son of Īśāna of Muktisthala, and it is said to have been written at the time when Rāmavarman and Gōdavarman reigned in the Cochin State.

Complete.

Beginning:

अखिलासुरसुरमानुषनिकरानतचरणं
गगनेचरवनिताजननुतिगीतिसुमुदितम् ।
तुहिनाचलतनया . . . . . ज(ज)तरमनिशं
प्रणमामि तमहिमण्डितचरणाम्बुजयुगलम् ॥
यदनुग्रहविरहे सति भवक्लेशवविधयः
प्रभवन्ति न वदितुं गिर इह किं पुनरपरे ।
तुहिनद्युतिशकलच्छविविलसज्जटमनिशं
प्रणमामि तदधिदैवतममलच्छवि वचसाम् ॥
तुहिनदीधितिखण्डलसज्जटं रविशशाङ्ककृशानुविलोचनम् ।
वटतटीकृतराममहं भजे रजतवर्णमनङ्गहरं हरम् ॥
महिषप्रोथनिहितचरणं कारणं महः ।
मुक्तेर्मुक्तिस्थलास्थानं दौर्गं दुर्गं भजे मुहुः ॥
यदनुग्रहतः पुंसां मतिर्दर्पणनिर्मला ।
यतीशं तं गुरुं वन्दे त्रय्यन्तोदधिपारगम् ॥
वेणुनिनादविनोदितविश्वं गोपजनोचितवेषविलासम् ।
तुम्बुरुनारदगीतचरित्रं नौमि सदा वसुदेवसुतं तम् ॥
तत्त्वप्रकाशिकानाम्ना व्याख्या शौरिकथाश्रया ।
क्रियते नीलकण्ठेन श्रुतार्थपरिशुद्धये ॥
रामवर्ममव(नृप)तौ महीमिमां पाति साकमिव गोदवर्मणा ।
नीलकण्ठमहितार्ङ्किकृता(सा) वृत्तिरान्ध्यमतिदोषहन्त्य(न्त्य)सौ ॥
पदच्छदादाविह यत्क्रमेण पदान्वयस्तत्क्रमतोऽर्थवादः ।
विशेषणानामथ योजनेति व्याख्याप्रकारो गदितो ममात्र ॥

अथ शौरिकथाख्यं यमककाव्यं चिकीर्षुः कविः करिष्यमाणकाव्यनिष्प्रत्यूहपरिसमाप्त्यादिनिखिलप्रयोजनसिद्ध्यर्थं

"स्मृते सकलकल्याणभाजनं यत्र जायते ।
पुरुषं तमजं नित्यं व्रजामि शरणं हरिम् ॥"

इत्यादिवचनानुसारेण श्रीकृष्णाख्यविशिष्टेष्टदेवता . . . . श्लोकत्रयेण ॥

(मू)—अवनतदेवं देहं पुंसः परमस्य सम्पदे वन्देऽहम् ।
यं पदमम्बुध्यन्ते यतयो यत्तत्त्वमुत्तमं बुध्यन्ते ॥

अवनतदेवं-देहं-पुंसः-परमस्य-सम्पदे-वन्दे-अहं-यं-पदम्-अम्बुध्यन्ते-यतयः-तत्तत्त्वम्-उत्तमं-बुध्यन्ते ।

अहमिति कविरात्मानं निर्दिशति; वासुदेवनामाहमित्यर्थः । परमस्य विशिष्टस्य, यद्वा परा उत्कृष्टा मा श्रीर्यस्येति विग्रहः । तस्य पुंसः पुरुषस्य श्रीकृष्णाख्यस्य देहं शरीरं वन्दे इत्यन्वयः । वन्दनप्रयोजनमाह, सम्पद इति । सम्पत् समृद्धिस्तत्सिद्ध्यर्थं वागर्थयोः समृद्धिरेवेह सम्पत् विवक्षिता, योग्यतरत्वात् । देहं विशिनष्टि—अवनतेति । अवनताः प्रणताः देवा यस्येति विग्रहः; तम् । देवशब्दः ऋष्यादीनामप्युपलक्षकः । सततं ब्रह्मादिभिर्देवैः नारदादिभिर्मुनिमुख्यैश्च नमस्कृतमित्यर्थः ।

* * * *

एवं पुराणार्थस्मरणसिद्ध्यर्थं व्यासं प्राणंसीत् । सम्प्रति स्वकृतकाव्यं गुणवदपि मत्सरग्रस्ततया केचिन्न गृह्णन्ति इति राजवल्लभतयापि स्वकृतकाव्यप्रचयसिद्ध्यर्थं तत्कालवर्तिनं राजानं स्तौति—जयतीति ।

(मू)—जयति सुधामा रामः क्षितिपालः काव्यवीरुधामारामः ।
दधदिभमस्तकलीलामंसेन बिभर्ति योऽयमस्तकलीलाम् ॥

जयति-सुधामा-रामः-क्षितिपालः-काव्यवीरुधाम्-आरामः-दधत्-इभमस्तकलीलाम्-अंसेन-बिभर्ति-यः-अयम्-अस्तकलीलाम् ॥

रामः रामाख्यः क्षितिपालो राजा जयति वीर्यशौर्यादिगुणशालितया सकलभूपालानतिशय्य वर्तत इत्यर्थः ।

* * * *

अथ यदर्थमिष्टदेवतानमस्कारादिकं कृतं तदारभते —अथेति ।
अथ षट्सु कुमारेषु भ्रात्रा व्यापादितेषु सुकुमारेषु ।
सुतमेकं सद्वेषं प्रासूयत देवकी सकंसद्वेषम् ॥

अथ-षट्सु-कुमारेषु-भ्रात्रा-व्यापादितेषु-सुकुमारेषु-सुतम्-एकं-सद्वेषं-प्रासूयत-देवकी-सकंसद्वेषम् ।

अथशब्दः कथारम्भार्थः । देवकी वसुदेवभार्या षट्सु षट्सङ्ख्यातेषु कीर्तिमत्प्रभृतिषु च कुमारेषु स्वपुत्रेषु ।

* * * *

Colophon :

इतीशानसूनुनीलकण्ठपूज्यपादविरचितायां शौरिकथाव्याख्यायां तत्त्वप्रकाशिकायां प्रथम आश्वासः समाप्तः ॥

End :

काव्यार्थमुपसंहरति—-विष्णुरिति ।

विष्णुर्विपक्षकक्षस्य स्वपदानतया दवः ।
विजहार द्वारवत्यां स्वपदानतयादवः ॥

विष्णुः-विपक्षकक्षस्य स्वपदानतया दवः विजहार-द्वारवत्यां-स्वपदानतया-दवः ।

विष्णुर्द्वारवत्यां विजहार क्रीडितवान् ; कीदृशः स्वपदानतया सुशोभनमपदानम् अद्भुतकर्म यस्य सः ; स्वपदानः तस्य भावः स्वपदानता तया हेतुभूतया विपक्षकक्षस्य शत्रुवनस्य दवः वनाग्निः । वनाग्निर्हि स्वतेजसा सकलमपि वनसमूहमुन्मूलयति । अयमपि स्वपदानतया विपक्षकान्तारसमूहसमूलोन्मूलनात् दवतुल्य इत्यर्थः । स्वपदानतया सहित इति वा । तथा स्वपदानतयादवः स्वस्य पदकमलावनतनिखिलयादवजन इत्यर्थः ; यमकपद्यानां वृत्तनियमो नास्तीत्यस्माभिरादावेव कथितमिति शिवम् ॥

यत्कृपालेशतोऽज्ञोऽपि सुराचार्यसमो भवेत् ।
कर्मन्दिबृन्दवन्द्यं तं गुरुं वन्दे यतीश्वरम् ।.

श्रुतमपि गुरुमुख्याद्वक्तुमर्थं न दक्षो बहुदिनमनुचिन्ताहानिदोषेण यः स्यात् ।
मनसि जनिततापस्तं च हातुं कृतैवं महति यमककाव्ये वृत्तिरेषा स्फुटार्था ॥
मुक्तिस्थलो भवसि(सु)तो गिरिराजकन्यापादाब्जधूलिरनिशं निगमान्तसेवी ।
गोविन्दभक्तिरससंभृतिशुभ्रकण्ठो व्याख्यामिमां व्यरचयत्खलु नीलकण्ठः ॥

Colophon :

इतीशानसूनुनीलकण्ठपूज्यपादविरचितायां शौरिकथाव्याख्यायां तत्त्वप्रकाशिकायां षष्ठ अश्वासः ॥

समाप्ता चेयं तत्त्वप्रकाशिका ॥

No. 11816. सत्यापरिणयः.
SATYĀPARIṆAYAḤ.

Substance, palm-leaf. Size, $11\frac{5}{8} \times 1\frac{1}{2}$ inches. Pages, 110. Lines, 7 on a page. Character, Telugu. Condition, good. Neatly written. Appearance, old.

Complete in 12 Sargas.

This is a poem treating of the marriage of Satyabhāmā and Kṛṣṇa. By Ekāmranātha, who wrote this poem at the instance of King

Immaḍi-Aṅkuśa, son of Aṅkuśarāya of Rāṇa family. For detailed particulars regarding this king, see No. 11535 of the D.C.S. MSS. It is here stated that Jagatāparāya, uncle of Immaḍi-Aṅkuśa conquered Mūrtijākhan, Nūrūkhan, Cittakhan, Saujātakhan and protected Cērnamulk and that Aṅkuśarāya had also two sons named Kastūri and Śiva by his wife Lakṣmama, the daughter of King Raghuvar

Beginning :

श्रीसत्यातरुणीमणेर्गलतले पाणिद्वयेनाङ्गुलि-
द्योताकल्पितनूत्नरत्नयुतिसंशोभं हितैः स्पर्शनैः ;
बध्नन् तत्पुलकोदयं परिणये कल्याणसूत्रं परं
राणामाण्डमहीश्वराय सततं देयादभीष्टं हरिः ॥ १ ॥
विघ्नार्गलस्तोमविभेदनाय भजन्तु सर्वेऽजमुशा(खा)न् सुरेशान् ।
कवीश्वरा ग्रन्थमुखेषु सोऽहं भजामि देवं करिवक्त्रमेव ॥ २ ॥
अस्त्यम्भोरुहनेत्रमागमशिरोज्ञेयं समस्तादिमं
सर्वज्ञं स्तिमितात्मभिर्मुनिवरैः सन्त्यक्तकामादिभिः ।
ध्यातं सन्ततमब्जसम्भवमुखैः संस्तूयमानं सुरैः
सानङ्गं परिवीक्षितं कमलया नारायणाख्यं महः ॥ ३ ॥
सानन्दा हृदयाम्बुजेषु सततं ध्यायन्ति यद्योगिनो
येनाक्रान्तिमगाद्बलेरपहृता गर्वस्य लोकव्रजः ।
यस्मादुद्भवरू(मा)प जह्नुतनया लोकत्रयीपावनी
तस्मादङ्घ्रियुगात्सुदर्शनभृतो वर्णस्तुरीयोऽजनि ॥ ४ ॥
तस्मिन्वर्णललाम्नि जह्नुतनयासोदर्यताविश्रुते
वर्णे भूमिभुजां रघोरभिजनो लोके यथाविन्दत ।
ख्यातिं तद्वदतुल्यशौर्यकरुणादानादिकैः सद्गुणैः
राणावंशवरः प्रसिद्धिमधिकां गोत्रेषु संविन्दते ॥ ५ ॥
योगेनावरवर्ण इत्यभिदधल्लोके परेणेतरा-
नेतद्वर्णभवानथापि मनुजैः संस्तूयमानान् गुणैः ।
वद्वंशोद्भवभूपतीनभिदधल्लोकप्रसिद्धाभिधान्
रामाद्यैः सदृशानथोत्तमतरस्तोत्रार्थतामर्हति ॥ ६ ॥
तस्माद्वंशतरान्महोन्नतियुतात्सद्वृत्तवासंयुतो
यातो भूपतिजालरम्यमकुटश्रेणीपरिष्कारताम् ।

माण्डक्ष्माभृदजन्यजन्यपटलत्रासोऽत्र मुक्तामणेः
सादृश्यं गतवान्परस्य विशदाभिख्यः सुवर्णोचितः ॥ ७ ॥
रामो नित्यसुखाप्तयेऽवतरणं माण्डप्रभोर्दम्भतो
यातो नाथसमग्रशौर्यभरताभिख्या च तस्यानुजे ।
जागर्त्यङ्कुशरायभूभृति कथं कस्मान्नृसिंहेऽनुजे
पूर्णा लक्ष्मणतास्य वेङ्कटपतौ शत्रुघ्नतास्यानुजे ॥ ८ ॥
शासना(द्रा)ज्यं स माण्डक्षितिपतिरखिलक्षोणिपालैर्नुताङ्घ्रिः
कृत्वा धर्मानशेषान्बुधकविनिकरश्लाघ्यमेकं निदानम् ।
कीर्तेः काव्यं परीप्सन्नपरिमितकलावेदिभिः सेविताया-
मासीनः सन्सभायां सविनयमवदन्मां तदाहूय वाक्यम् ॥ ९ ॥
वेत्त्येकस्तर्कशास्त्रं परमितरबुधः पाणिनीयैकविज्ञः
कश्चिद्वेदान्तशास्त्रं हृदि वहति परो (भ)ट्टशास्त्रे प्रवीणः ।
अन्य काव्यं विधातुं प्रभवति चतुरः कोऽप्यलङ्कारशास्त्रे
किं वान्यो लब्धवर्णस्त्वमिव बुधमणे सर्वविद्यास्वभिज्ञः ॥ १० ॥
एकाम्रनाथ इति नाम जगत्प्रसिद्धं सर्वज्ञतां तव परं विशदं प्रवक्ति ।
या दुष्टशिक्षणविधौ पटुतारतां दुर्वासोऽन्वये जननमेव परिब्रवीति ॥ ११ ॥
त्वया समानोऽत्र किमस्ति विद्वान् यतो महानङ्कुशरायभूपः ।
ममानुजः सर्वकलाप्रवीणो विद्वांसमूरीकुरुते भवन्तम् ॥ १२ ॥
काव्यं सुवृत्तं सरसं विधातुं त्वमेव सर्वज्ञमणिप्रवीणः ।
मदङ्कितं तत् कथयस्व काव्यमेकं युतं सत्कथया मुरारेः ॥ १३ ॥
मामुक्त्वेत्थं सहर्षं स महिपतिवरो भूषणैरप्यसङ्ख्यै-
र्वासोभिर्गन्धपुष्पैः सविनयमथ सम्भावयामास शौरिः ।
श्रुत्वाहं तस्य वाक्यं प्रमुदितहृदयः काव्यवर्यं च सत्यो-
द्वाहाख्यानं प्रकर्तुं गुणगणयुतमुद्युक्तवानस्मि साधु ॥ १४ ॥
मत्काव्यनायकमणेर्माण्डनाममहीभुजः ।
अन्ववायोऽधुना साधु वर्ण्यते सद्गुणैर्युतः ॥ १५ ॥
राणावंशवरे समस्तधराणिख्याते गुणैरन्विते
श्रीगौरीसममल्लमाख्ययुवतेस्तिम्मक्षमावल्लभात् ।
शिङ्गक्ष्मापतिराडवाप जननं पार्थो रणे वैभवे
सुत्रामा भक्तिरब्जजस्य च दृशोर्जैवातृकः पार्थिकः ॥ १६ ॥

तत्कीर्तिप्रकरप्रतापविजितौ भूत्वा शशाङ्कानलौ
भूयः साम्यमपीच्छतो यदि तदा लज्जां विहाय ध्रुवम् ।
तन्निष्ठा जडता स्वकारणगुणोद्भूतिं गता चन्द्रमा
यस्मादम्बुनिधेरवाप जननं वह्निः कृपीटोद्भवः ॥ १७ ॥
स गङ्गमाख्याम्बुजलोचनायां शिङ्गक्षितीन्द्रो जननित्यकीर्तिः ।
अजीजनत् साहसविक्रमार्कं दाने च कर्णं जगदेकरायम् ॥ १८ ॥
वेद जगदेकमहिभृत्करवालो न (खलु) पूर्वराहुर्यत् ।
न पुनस्तेन च तेजो ग्रस्तं सद्राजमण्डलं प्राप ॥ १९ ॥
जित्वा पुराणपुरपादशहक्षितीन्द्र-
मश्वान्गजानगणितान् तरसाभ्यगृह्णात् ।
यस्तस्य किन्नु जगदेकमहीधवस्य
तुल्यः श्रुतो रणपते(थे) प्रविहाय पार्थम् ॥ २० ॥
गिर्यम्बातरुणीमणेः स जगदेकक्ष्मापतिर्विश्रुतौ
शौर्याद्यैर्जगतापरायजगदेकक्षोणिनाथौ ततः ।
सूर्याभं जगतापरायनृपतिं प्रोद्भिन्नवैरिक्ष्मा-
नाथं चास्य मदाङ्कुशक्षितिपतिं चाजीजनद्धार्मिकम् ॥ २१ ॥
एतेषां जगतापरायनृपतेरन्येष्वसाधारणं
सप्त्यारोहणकौशलं महितले दृष्ट्वा धरित्रीजनाः ।
वश्चयन्ते स्म मदान्धदुष्टयवनव्रातं जिघांसुं परि-
प्राप्तं कल्क्यवतारमब्जनयनं लोकावनायोद्यतम् ॥ २२ ॥
योऽरक्षीद्दुर्गवर्यं घनगिरिमहितौ मुर्तिजाखाननूरू-
खानौ जित्वा च शूरौ महितवलयुतं चित्तखानं च युद्धे ।
जीवग्राहं त्वगृह्णाद्बहुबलमपि निर्भिद्य सौजातखानं
योऽरक्षीचेर्नमल्कं स जयति जगदेकावनीनाथशौरिः ॥ २३ ॥
श्रद्धा तज्जगदेकरायनृपतेर्यातं प्रतापानले
दुष्प्रापे तृणतां तुरुष्कपटलं दृष्ट्वा धरित्रीजनः ।
जानीते हृदि तत्प्रसिद्धयवनव्राताभिधाने क्रमा-
त्प्राप्तं म्लेच्छकमण्डलस्य लतनं(?) वर्णे सवर्णस्थले ॥ २४ ॥

तीक्ष्णैस्तज्जगदेकरायविशिखैस्तीक्ष्णैर्विभिन्नात्मतां
सम्प्राप्ता यवना रणेषु बहुशो गाढं गताः साध्वसम् ।
ध्यात्वैवं निजमानसेषु विशदं मुग्धे युधात्मीयता-
बुद्ध्यास्मानिति यान्ति ते विशिखतां योगान्तराभावतः ॥ २५ ॥

नूनं तज्जगदेकरायनृपतेर्दानेन भूत्वा जिता
सम्प्राप्ता भयमत्ति निर्जरगवी नित्यं तृणानां चयम् ।
तस्यैश्वर्यभरेण निर्जितनरैश्वर्यो ध्रुवं शङ्करो
वैराग्यं समवाप्य तत्र भजते भैक्षाशनं सन्ततम् ॥ २६ ॥

व्यक्तं तज्जगदेकराययशसा यातः पराभूततां
लज्जामेत्य तु पुण्डरीकनिचयः सायं द्विरेफावलेः ।
अन्तर्धारणकैतवेन गरलं स्वादत्यतो गाहते
वार्हि कोकनदाटवीविहरणव्याजेन हंसव्रजः ॥ २७ ॥

विख्यातो जगतापरायनृपतिस्तस्यानुजो योऽभव-
द्वर्णस्तस्य कथं नु विक्रमभरो यस्य प्रतापाग्निना ।
तप्ता यत्प्रतिवासरं जलनिधावद्यापि मज्जत्ययं
सायं पश्चिमतां गतेऽस्तमितताव्याजेन भासां ततिः ॥ २८ ॥

यद्धर्माधिककौशलं पटुतरं प्रत्यर्थिनां संहतौ
दारिद्र्याचललब्धवर्णपटलीनिष्ठस्य यत्संश्रितम् ।
धैर्यं मेरुगिरेर्जये च कुमतव्रातस्य चोद्भेदने
स श्रीमान् जयति स्म विश्रुततरो राणाङ्कुशक्ष्माविभुः ॥ २९ ॥

श्रीराणाङ्कुशरायभूपतिमणेर्वर्ण्यः कथं विक्रमः
स्थित्वा यत्पुटभेदनेषु नितरां विद्धास्तदीयैर्बलैः ।
सम्प्राप्ता गहनान्तराणि गरलौपम्यं हृदा जानता
मन्यन्ते नगराह्वयानुचिततां स्मैषान्तर(प्रत्यर्थिनः)क्षोणिपाः ॥ २० ॥

तस्मिन् शासति संहतारिपटले राज्यं समस्तावनी-
नाथालीप्रणताङ्घ्रिपद्मयुगले नैवास्य योऽभवत्कलिः ।
शास्त्रादुक्तिरभूत्परं तु विदुषां नैतत्पुराणां वने
सालं वध्यकता न तस्य गणकेष्वेवास्य सङ्ग्रावरः ॥ ३१ ॥

तत्कीर्त्या च भवोऽभितो विशदया यातः पराभूततां
सन्तापं समवाप्य तस्य हृदये गङ्गां बिभर्ति ध्रुवम् ।
तद्वत्प्राप्य पराभवं शुचिरलं तस्य प्रतापेन किं
सम्प्राप्तो बडवामुखं जलनिधेरम्भः पिबत्यन्वहम् ॥ ३२ ॥
तस्याजौ परिविद्धतामधिगता योधैर्निशातायुधै-
स्त्रासावेशपलायिता वनमथ प्राप्ता द्विषद्भूमिपाः ।
आश्वासं समवाप्य वेषदवनाद्वानार्हतामत्र ते
मन्वानाः स्म बुधा नरौरविगमे पृच्छन्ति सूत्रं तदा ॥ ३३ ॥
लग्ने शुभे वीरपभूमिनाथजातामुवाहाङ्कुशरायभूपः ।
कन्यामणिं सोऽथ सलिङ्गमाख्यां यथा मुरारिः श्रियमम्बुजाक्षीम् ॥ ३४ ॥
तस्यास्त्वं पदसत्त्वसंयुतहृदस्साम्यं महीभृत्सुता
नो याति तु चं ति केति कथयत्येतद्वतं प्रस्फुटम्(?) ।
नामैवाब्धिसुता तथेति सततं ब्रूते निजे भर्तरि
प्राप्तायां विनयं च तद्वतमुरो भर्तुश्श्रितत्वं सदा ॥ ३५ ॥
तस्यामभजत पुत्रानङ्कुशरायस्तु माण्डभूपालम् ।
इम्मडि(डि)-अङ्कुशरायं शूरं नरसिंहभुत(प)वर्यं च ॥ ३६ ॥
अङ्कुशरा(य)नृपालो धन्यामन्यामुवाह कन्यां सः ।
रम्यां विट्ठलमाख्यां वेङ्कटपतिमाप पुत्रमेतस्याम् ॥ ३७ ॥
रघुवप(र)भूपतिपुत्रीमन्यां चोवाह लक्ष्ममाख्यां सः ।
तस्यामभजत धीरौ शिवकस्तूर्यताख्यता(योख्यया)न्वितौ पुत्रौ ॥ ३८ ॥
तीक्ष्णैर्माण्डमहीश्वरेण नितरां विद्धा रणे मार्गणैः
प्रत्यर्थिक्षितिनायका दरयुता याता दिगन्तानमी ।
तस्यांश्या(च्या)नात्किमु चञ्चरीककृतकीटौपम्यतो मानसे
नित्यं मार्गणतां स्वयं समभजन्याता नजिह्मां गतिम् ॥ ३९ ॥
साधर्म्यं गतवन्त एव विदधत्यापत्सु संरक्षणं
यस्मान्माण्डमहीभुजो रणतले भग्नान् परं धावतः ।
सन्त्यज्य स्वपुराण्यनन्यगतिकान्प्रत्यर्थिनो भूभृतो
दत्वा कन्दरमन्दिराणि विविधं पुष्णन्ति यन्नूभृतः ॥ ४० ॥

शेषश्चक्रिकुलान्वितो महिभृतः पाकारिसंशिक्षिता
गोत्राधःकृततां गतश्च कमठो घोणी दराभान्वितः ।
दिङ्नागाः कुमुदान्विता इति विमृश्येयं धराभामिनी
भर्तारं समवाप्य सद्गुणयुतं माण्डप्रभुं मोदति ॥ ४१ ॥
नूनं तद्धरणीपतेर्विशदया कीर्त्या पराभूततां
प्राप्तापत्रपया युतो महितया गङ्गाम्बुधिं गाहते ।
तद्वद्भानुरपि प्रतापरविणा यातः पराभूततां
तस्यानुप्रविशत्ययं प्रतिदिनं सायं कृपीटोद्भवम् ॥ ४२ ॥
वेगात्मप्रतिपक्षचित्तविभुतान्यक्कारिणं गौतमं
किं नु प्रत्युपकर्तुमिच्छति हरिव्रातोऽस्य यात्रासु यत् ।
खे गङ्गां स्वखुरोद्धतेन रजसा यत्पङ्कयन्पङ्कजा-
ह्वानं योगवदम्बुजेषु विदधत्तस्यां सहायो मते ॥ ४३ ॥
रम्यैरिम्मडि-अङ्कुशक्षितिपतेर्वाचां विलासैर्जिता
वाणी तिष्ठति काननेषु सततं याता वलक्षात्मताम् ।
दातृत्वेन जितोऽपि दैवततरुस्तुल्यत्वमाकाङ्क्षते
यस्मादेष ततो जगत्सु भजते मन्दारनामद्रुमम् ॥ ४४ ॥
श्रीराणेम्मडि-अङ्कुशक्षितिभुजा यस्माज्जितोऽभून्नतो
बाढं सैन्धवकौशले तृणसमं योग्याह्वयोऽभूदतः ।
पक्षत्वं क्षितिशासनेऽधिकतरं दृष्ट्वा यदीयं जनै-
र्गर्हा यत्पुरुकुत्सभूपतिरगात्सार्थाभिधानो दधत् ॥ ४५ ॥
क्षत्राणां प्रतिभाहरेण महता तस्य प्रतापेन किं
नक्षत्रप्रतिभाहरो रविरयं साम्यं भजेत स्वयम् ।
तत्कीर्त्या भुवि निष्कलङ्कतरया पूर्णोऽपि भूत्वा शशी
साम्यं किन्तु भजेत लोकविदितं रात्रीकलङ्कं दधत् ॥ ४६ ॥
कीर्ताविम्मडि-अङ्कुशक्षितिपतेः पूर्णे सुधांशौ सदा
रात्रावह्नि च जाग्रति स्फुटतया पद्मोद्भवेन ध्रुवम् ।
वैयर्थ्यं परिचिन्त्य सम्प्रति मषीबिन्दुर्विधौ निर्मितः
पूर्वं लाञ्छनकैतवेन बहुधा ब्रूते जनस्तं भ्रमात् ॥ ४७ ॥

इम्मडि-अङ्कुशरायक्षितिपतिमहिमा कथं नु विज्ञेयः ।
यदयं शेषजयत्वं वाग्भिर्गत्वाप्यशेषजययुक्तः ॥ ४८ ॥
वाताशी भुजगाधिपश्च कमठो धत्ते सदा कर्परं
स्वाहारात्मविभेदिजातिसहितो घोणी दिशावारणाः ।
पद्मापाकृतिहेतवोऽद्रिनिचयः शैलं गता वर्तनं
प्राप्तेरिम्मडि-अङ्कुशाख्यनृपतिं धत्ते मुदं क्ष्मावधूः ॥ ४९ ।
संशान्ति प्रापयन्तं नविनययुतिमद्वाहिनीनाथगर्वं
पौलस्त्यभ्रातृजैत्रं बुधविनुतमहादानरीत्याङ्कुशेन्द्रम् ।
विष्ण्वात्मानं सदाङ्घ्रिप्रणतपरिचरल्लक्ष्मणं प्राहुरेतं
सानन्दं लब्धवर्णा सकुशलवसुतानन्दितं रामचन्द्रम् ॥ ५० ॥
पूजां विन्दति भोजराजसदृशं सङ्गीतसाहित्ययोः
प्रौढस्येम्मडि-अङ्कुशक्षितिपतेर्विद्या सभायां परम् ।
अन्येषां तु मदान्धतायुतदृशां विद्याविहीनात्मनां
भूपानामबुधप्रजाहितपटाटोपः परं पूज्यते ॥ ५१ ॥
नूनं नृसिंहधरणीपतिकैतवेन साक्षादहोबिलपतिर्जननेन युक्तः ।
नो चेद्धिरण्यकशिपुप्रकटप्रदानप्रौढत्वमद्य भजते कथमेष साधु ॥ ५२ ॥
एतादृशानुजवरैर्विनयेन युक्तैः संसेविताङ्घ्रियुगलस्य विशालकीर्तेः ।
माण्डावनीतलपतेर्महिमान्वितस्य प्रत्यर्थिभूमिपतिमण्डलभेदकस्य ॥ ५३ ॥
आरब्धस्य मयेदानीं तस्याभ्युदयवृद्धये ।
काव्यस्य सद्रसोपेतो वक्ष्यतेऽयं कथाक्रमः ॥
श्रियः पतिः सर्वजगन्महेश्वरो हरिः पुराणः पुरुषोऽब्जजन्मना ।
धरावनार्थं बहुधार्थितोऽभवत् कुले यदोरानकदुन्दुभेः सुतः ॥ १ ॥
वसन् पुरे द्वारवतीसमाह्वये खलार्दनं शिष्टजनौघरक्षणम् ।
ततान सद्भक्तजनान् भवाम्बुधेः ररक्ष च स्वावगमोपदेशतः ॥ २ ।
शतक्रतुप्राप्तमनोरथव्रजा सनन्दना चामृतकल्पिताशना ।
बभौ पुरे यत्र महीसुरावलिर्यथा बुधालिर्गुरुशासने स्थिता ॥ ३ ॥

End:

इत्थं निशम्य वचनं करुणापगाया दैन्येन युक्तमधिकं करुणार्द्रचित्तः ।
तां सान्त्वयन्मुरहरो निजगाद वाक्यं विख्यादि(तदी)ममनुजावनबद्धदीक्षः ॥

अङ्कुशभूपतिसूनोर्मोण्डावनिनायकस्य काव्येऽस्मिन् ।
सत्यापरिणयनाम्नि द्वादशसर्गो रसोज्ज्वलो जातः ॥

No. 11817. सत्यापरिणयम्.
SATYĀPARIṆAYAM.

Substance, paper. Size, 8¾ × 5½ inches. Pages, 348. Lines, 9 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Contains the Sargas 1 to 12 complete.

Same work as the above.

No. 11818. साळुवाभ्युदयम्.
SĀLUVĀBHYUDAYAM.

Substance, paper. Size, 10⅝ × 8¼ inches. Pages, 153. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

This MS. was a copy of the palm-leaf MS. described under the next number.

Complete in Sargas 13.

A historical poem describing the greatness, valour and exploits of Narasiṁhadēvarāya who was named after God Narasiṁha of Ahōbila and who reigned at Chandragiri and afterwards at Vijayanagar.

His genealogy is given thus :

Guṇḍudēva (= Kamalādēvī), a king of the lunar race who reigned at Kalyāṇapuri.
|
Guṇḍaya | Sāluvamaṅgi | Sāvitrimaṅgi | Vīrōbala | Gautaya | Mādidēva
|
Gautaya (son of Sāluvamaṅgi)
|
Guṇḍudēva = Mallāmbikā
|
Narasiṁharāya.

The author of the work is Rājanātha, well-known by his title Ḍiṇḍimakavi, son of Aruṇagirīśa *alias* Śōṇādrinātha and great grandson of Bindūdakavi.

The titles of Narasiṁharāya and his predecessors are found given in the beginning as well as in the colophons of the different Sargas

Beginning :

करोतु लक्ष्मीं कलभाननो वः कारुण्यपूरप्रमदा यदीयाः ।
मन्दाः शिरो मौक्तिकसस्यशालि क्षेत्रं नदीमातृकयन्त्यजस्रम् ॥
अनर्घ्य(र्घ)चूडाभरणं पुरारेः . . . . देवतानाम् ।
आह्लादनं स्थावरजङ्गमानामनङ्गसञ्जीवनमस्ति तेजः ॥

मण्डोदधेर्मन्दरभूधरेण प्रमथ्यमानात् प्रथमेन पुंसा ।
नभश्चरायुष्यमुदे . . . . नवनीतपिण्डम् ॥
निजाङ्कलक्षेक्षितचक्षुदष्टनीलोत्पलं नीरनिधेः समुद्यन् ।
आलक्ष्यते हंस इवाश्रितो यः पक्षद्वयाप्त्या पथि खेचराणाम् ॥
निवेश्य ल(क्ष्मीर्निजवं)शजानां सती(:)प्रियाः सारसमन्दिरेषु ।
स्वयं करैर्मुद्रयति ध्रुवं यः क्षपासु तद्गर्भ्यदलाकराणि ॥
अदक्षिणत्वेऽपि यदक्षि शौरेरालोकजातैरमृतैर्नवीनैः ।
तनोति सन्तोषभरं जगत्याः सचेतनाचेतननिर्विशेषम् ॥
दिव्यर्षिशकादिसुरासुरेन्द्रशिरोवतंसाङ्घ्रिसरोरुहेण ।
हरेण मूर्ध्न्यप्यवतंसभावमनायि यो ह्यमपां प्रसूनम् ॥ [ऽभूत् ।
बुधस्ततोऽभूद् बुधलोकमान्यः पुत्रोऽवर(रूरवा)स्सोऽपि बुधात् ततो-
ऐलिं यमारभ्य हिमांशुवंश[:]समुद्भवा यान्ति धराधिपत्यम् ॥
नानापदानो नहुषस्ततोऽभूत् ततोऽभवद्धैर्यनिधिर्ययातिः ।
जरां गृहीत्वा जनकाय यस्मै पूरुः स्वतारुण्यमदादपूर्वम् ॥
कालक्रमात् कल्पितखेचरेन्द्रसङ्ग्रामसाहायकशौर्यधुर्याः ।
तद्वंशजाताश्चतुरब्धिसीमां धात्रीमशेषामशिषन्महीशाः ॥
(प्रापुर्नि)जांशावतरोचितं ते चालिक्कनारायणशब्दभाजः ।
सौहि(त्य)मल्लश्रुतिमावहन्तं मुरारिसंज्ञामपि मोहनाद्याम् ॥
सारेण बाह्वोः सकवारिरायशाणूरमल्लप्पडिघाणमल्लाः ।
भूमेरभूवन् प्रियभर्तृभावात् ते मेदिनीमीसरगण्डसंज्ञाम् ॥
सत्योक्तिविश्राणनधैर्यविद्याशौर्येषु नास्मत्सदृशा भुवीति ।
निवेदनार्थं किल पञ्चघण्टानिनादसंज्ञामगमन्नृपास्ते ॥
सर्वास्त्रविद्याविदुषां च येषां साधारणी साहसचिह्नमेकम् ।
मदोद्धतक्षत्रवधाय रामकुठारधारेव कठारिकासीत् ॥
येषां कठारी रणसीम्नि मुक्तकीलालधारा(नहिता)न्विधाय ।
पाणौ गृहीतापि च निस्सपत्नीभावाज्जयश्रीपरिणीतिहेतुः ॥
दैत्यावतारान् द्विषतो निहन्तुं धर्मं पदैः स्थापयितुं च येषाम् ।
कलौ मुरारेरवतारचि(ह्नं) कठारिकाजायत नन्दकासिः ॥
विधेः(धोः) कुलेय(श)स्य विधुन्तुदारिभयापनुत्त्यै पथि खेचराणाम् ।
किमुद्धता केतनवैजयन्ती वराहमुद्रा वलते (यदीया) ॥

(सिता)तपत्रच्छलफेनपुञ्जे सेनारजोवारिभृतेऽप्रसिन्धौ ।
माबाकिरिः किं व्यहरद्यदङ्कः स्वर्गेऽपि वासं द्विषतां निषेद्धुम् ॥
मया पुनर्दु(ष्टनृपालदर्प)मग्नाप्युदस्ता वसुधा समस्ता ।
इतीव वक्तुं यदनीककेतुपोत्री पुनर्विष्णुपदं गतोऽभूत् ॥
उद्यच्छमानं दिवि यद्ध्वजान्तरुदीक्ष्य गर्जन्तमिवेह पोत्रैः ।
(किटिं हि दृष्ट्वा)भृशमात्तशङ्कममर्त्यविद्वेषिकुलं तदासीत् ॥
समीरवेगोच्चलवाजिराजितरङ्गसङ्घे समराम्बुराशौ ।
यत्केतुघोणी रभसादकार्षीन्मृषावराहस्य विजृम्भिता(नि) ॥
येषामुदन्वत्परिखा कुलाद्रिसाला भवत्येकपुरी धरित्री ।
शाला गजानां चतुरब्धिवेला कोशालयः केवलमन्तरीपम् ॥
कलत्रमुर्वी करदैव येषां प्रजा प्रजापालनरक्षणाभ्याम् ।
कुलार्हचर्यानयनाद्गुरूणां युक्तोऽभवल्लोककुटुम्बिभावः ॥
अस्मत्कुलेशोऽस्तरुचिः कलेशो रवेः पुरस्तादिति यैः प्रभावात् ।
सृष्टेन तेजोरविणा स नूनं दिनप्रदीपस्य दशामनायि ॥
आलोकमात्रादविमुक्तसीमवाहिन्यधीशा वशितैकमूलम् ।
पद्मावना(द)द्भुतराजमावसाम्येन सचक्रमुदेऽभवन् ये ॥
सर्वस्वदानेषु निजं शरीरं मृत्पिण्डबुद्ध्यैव नयैर्वितीर्णम् ।
अन्यार्थसिद्धिर्यदि वोद्ध(वाभवि)ष्यत् तदप्यदा(यि)ष्यत दानवीरैः ॥
यद्वैरिणां केलिसरोऽम्बुराशिर्लीलाचला एव कुलाचलेन्द्राः ।
अन्यत् किमाक्रीडवनं विहर्तुं दिव्येक्षणाभिः सह दण्डका च ॥
जन्मस्थलं(स्वा)मिकुलेश्वरस्य श्रियोऽपि चेति द्विरदा यदीयाः ।
अब्धिं चमूपांसुनिपीयमानमपूरयन् किं स्वमदाम्बुपूरैः ॥
अधिष्ठिता दंष्ट्रिभिरद्रिवन्याः क्रीडागृहं कूटकिटैः पयोधिः ।
द्वीपाश्च वाराहमुखा द्विज(ष)न्तः क यान्ति यल्लाञ्छनकोलभीताः ॥

* * * *

चिरार्जितानां तपसां विपाकात् तेषां जनानामपि भागधेयात् ।
कलाकलापैकनिधिः कलेशकुलावतंसोऽजनि गुण्डदेवः ॥
आहुर्यमाद्या विबुधावनार्थमाद्यावतारं मरुतामधीशम् ।
नीत्वा स्वरार्तिं निहतान् निषादान् सर्वश्रुतिस्थापनसावधानः ॥
अगापयद्दिव्यवधूभिरात्मगुणप्रबन्धानपि गुण्डदेवः ।
विजित्य यो दिग्विजयाय सज्जं युद्धे सुरत्राणमुदग्रशौर्यम् ॥

* * * *

वक्रत्व(युक्ति)वचनेऽपि केशेष्वासीच्च नीवीहरणं रताद्यौ ।
अमुष्य कल्याणपुरीति गीतमासीन्निवासः पुरमन्वितार्थः ॥

* * * *

सरस्वतीव द्रुहिणस्य तस्य देवीपदं कामलदेव्ययासीत् ।
क्षान्त्येव भूमा क्रिययेव वेदो धृत्येव वीरो दययेव धर्मः ॥
नवार्थसंख्येव गु(गि)रां निबन्धो नराधिपोऽदीपि तया नताङ्ग्या ।
श्रीगुण्डयः साळुवमङ्गिदेवः सावित्रिपूर्वोऽपि च मङ्गिदेवः ॥
वीरोबलो गौतयमादिराजौ षट् तेन तस्यां जनिताः कुमाराः ।
शम्भोः षडङ्गैरिव तैः प्रसूतैः तस्मात् स्वतेज परिपूरिताशैः ॥
जगद्यथा सीम्नि कृतं कुलं तत् षोढा विभिन्नं भुवि शोभते स्म ;
तेषामनुज्ञामवगम्य वीरः शौर्योदधिः साळुव(मङ्गि)देवः ॥
आशा विजित्यापि च दाक्षिणात्यमसौ सुरत्राणमगाज्जिगीषुः ।
यस्मिन् खरादीनहितान् विजित्य रामः सुरत्राणवशंवदोऽभूत् ॥
अहन् सुरत्राणमसह्यवीर्य(र्योऽभिय)न्नहो साळुवमङ्गिदेवः ।
कृती ततः केरलराजचोलपाण्ड्यादिभूपेषु भयद्रुतेषु ॥

* * * *

प्रत्यर्थिनस्तेन पराजिता यत्पतत्रिणः साळुवपत्रिणेव ।
तदादि सर्वेऽपि च साळुवेन्द्रसंज्ञां भजन्ति स्म तदीयवंश्याः ॥

* * * *

आशानिग्रहतो विगृह्य सकलानन्तस्थितानप्यरीन्
स्वाधीनः प्रकृतौ स्थितः सकरुणं पश्यन् जगत् स्वात्मवत् ।
सोदर्यैः सह पञ्चभिः समरसैर्भूतैरिवात्मा परान्
स्वीकुर्वन् विषयान् गुरोः पदमगात् श्रीमङ्गिदेवस्ततः ॥
तेष्वेकोऽजनि गौतयस्त्रिभुवनख्यातस्ततो वीर्यतः
कर्णाद्येषु पृथासुतेष्वनुपमं पार्थोऽभिमन्युं यथा ।
प्रासूत प्रथितं कुमारमतुलं श्रीगुण्डदेवाह्वयं
यं वैकुण्ठमखण्डभूमिभरणोत्कण्ठावतीर्णं विदुः ॥
निष्कण्टकीकृत्य धरामसौ ततो निवेश्य राज्ये च नृपात्मजाभिः ।
कृती ततो गौतयभूमिपालः शमोन्मुखः पुण्यमगादरण्यम् ॥
इति भुवि नरसिंहनाम्नावतीर्णस्य लक्ष्मीपतेः
सुचरित इह गुण्डयेन्द्रात्मजस्यातिसौम्याकृतेः ।

सविरुदकविसार्वभौमाब्धितारापतेः सालुवा-
भ्युदय इति कृतौ कवेरादिमः सर्ग एषोऽगलत् ॥

Colophon:

इति मेदिनीमीसरगण्डगुर्जण्डयनरसिंहरायमहाराजचरिते बिन्दूदकविप्रपिता-महडिण्डिमकविराजनाथकृतौ सालुवाभ्युदयनाम्नि वीराद्भुतरसे का(व्ये)ग्रथमः सर्गः॥

* * * *

इति कठारिसालुवबिरुदमण्डनगुण्डयनरसिंहराजमहाराजचरिते चतुर्द्विचि-सार्वभौमडिण्डिमकविराजनाथकृतौ सालुवाभ्युदयनाम्नि महाकाव्ये द्वितीयः सर्गः ॥

* * * *

इति धरणीवराहबिरुदमण्डनगुण्डयनरसिंहरायमहाराजचरिते चेरचोलपाण्ड्य-प्रथमाराध्यडिण्डिमकविसार्वभौमराजनाथकृतौ सालुवाभ्युदयनाम्नि महाकाव्ये तृ-तीयः सर्गः ॥

* * * *

इति सौहित्यमल्लकठारिसालुवबिरुदमण्डनगुण्डयनरसिंहराजचरिते बिन्दू-दकविप्रपितामहडिण्डिमकविराजनाथकृतौ सालुवाभ्युदयनाम्नि महाकाव्ये चतुर्थः सर्गः ॥

* * * *

इति घुर्जरीसट्टविभाटबिरुदमण्डनगुण्डयनरसिंहराजमहाराजचरिते दशरूप-नारायणबिरुदमण्डनडिण्डिमराजनाथकृतौ सालुवाभ्युदयनाम्नि महाकाव्ये पञ्चमः सर्गः ॥

* * * *

इति चम्बुरायस्थापनाचार्यबिरुदमण्डलगुण्ड(य)नरसिंहराजमहाराज(चरिते) रसकवितासाम्राज्यलक्ष्मीपतेर्डिण्डिमकविराजनाथस्य कृतौ सालुवाभ्युदयनाम्नि महाकाव्ये षष्ठः सर्गः ॥

* * * *

इति मण्डलीकमलुवरगण्डबिरुदमण्डनगुण्डयनरसिंहराजमहाराजचरिते डि-ण्डिमकविराजनाथकृतौ सालुवाभ्युदयनाम्नि महाकाव्ये सप्तमः सर्गः ॥

* * * *

इति भुवनैकवीरसौहित्यमल्लबिरुदमण्डनगुण्डयनरसिंहराजमहाराजचरिते न-वनाअक(टक)भरताचार्यबिरुदडिण्डिमराजनाथकृतौ सालुवाभ्युदयनाम्नि महाकाव्ये अष्टमः सर्गः ॥

* * * *

श्रीरङ्गस्थापनाचार्यविरुदमण्डनगुण्डयनरसिंहमहाराजचरिते चतुर्वृत्तिसार्वभौमविरुदडिण्डिमकविराजनाथकृतौ साळुवाभ्युदयनाम्नि महाकाव्ये नवमः सर्गः ॥

* * * *

इति रायशूरमल्लविरुदगुण्डयनरसिंहमहाराजचरिते कविमल्लगल्लताडनपटुडिण्डिमकविराजनाथविरचिते साळुवाभ्युदये दशमः सर्गः ॥

* * * *

इति पञ्चघण्टानिनादविरुदमण्डनगुण्डयनरसिंहमहाराजचरिते प्रतिभटकविकुञ्जरपञ्चाननविरुदमण्डनडिण्डिमकविराजनाथकृतौ साळुवाभ्युदये एकादशः सर्गः ॥

* * * *

इति बर्बरबाहुविरुदमण्डनगुण्डयनरसिंहमहाराजचरिते चेरचोलपाण्ड्यप्रथमाराध्यहृदयशिवाभिख्यडिण्डिमकविसार्वभौमविरुदशोणाद्रिनाथात्मजराजनाथकृतौ श्रीसाळुवाभ्युदये महाकाव्ये द्वादशः सर्गः ॥

End :

अत्रेः कुलं पुनरलङ्क्रियते त्वयात्र राज्ञा यथा नरपते न तथा बुधेन ।
अन्तः स्मरन्निव पुरात्तमुपेन्द्रभावमातर्पयस्यमरनायकमध्वरेण ॥

* * * *

अंशोद्भवं दशरथात्मजमादिविष्णोः रामं यथैव विबुधाः प्रतिबोधयन्ति ।
आवेदयाम इह पूरुषमादिमं त्वामत्रावनौ जय चिरं नरसिंहराज ॥
आकर्ण्य वाचमिति सादरमन्वितार्थामभ्यर्हणां विरचयन्नुचितामसुष्यै ।
अव्याजबन्धुरवति स्म महीमशेषामाश्चर्यहेतुचरितो नरसिंहराजः ॥
इत्य(त्येवं) सुकृतैः कृतीकृतकलेः श्रीगुण्डयाम्भोनिधेः
शीतांशोर्नरसिंहविग्रहजुषो विष्णोश्चरित्राद्भुते ।
श्रीमड्डिण्डिमराजनाथकवितुः श्रीसाळुवेन्द्रोदये
काव्ये (नव्यरसे त्रयोदशतया) सर्गो जगालाद्भुतः ॥

Colophon :

इति मण्डलीकमलुवरगण्डमेदिनीमीसरगण्डराजपक्षिसाळुवकठारि. . . . . वराहादिविरुदमण्डनस्य गुण्डयराजकुमारस्य कुमारसमविक्रमस्य विक्रमार्कोदग्रपराक्रमस्य परकुञ्जराक्रमणसिंहस्य सिंहलादिद्वीपाधिपसंहृतिसेव्यमानस्य सिंहसंहननस्य नरसिंहराजमहाराजस्य चरिते द्वादशदेशसुहृत्ति-

पारदृश्वनोऽष्टभाषापरमेश्वरस्याभिनवनाटकभवभूतेर्माघाद्यतिवर्तिचित्रप्रबन्धपरमेश्व-रस्याष्टादिग्विजयपटहीकृतबिरुदडिण्डिमाडम्बरस्य षड्दर्शनषण्मुखस्य शैवशास्त्र-जीवातोरखिलवेदसागरसांयात्रिकस्य डिण्डिमकविसार्वभौम इति कृतापरबिरुदनाम्नः श्रीमदरुणगिरीश[स्य] तपःपाकस्य डिण्डिमकविराजनाथस्य कृतौ श्रीसालुवाभ्युदये त्रयोदशः सर्गः ॥

समाप्तमिदं काव्यम ॥

No. **11819**. सालुवाभ्युदयम्.

SĀLUVĀBHYUDAYAM.

Substance, palm-leaf. Size, 15⅝ × 1⅛ inches. Pages, 87. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains 1 to 13 Sargas complete.

Same work as the above.

No. **11820**. सीतापरिणयः.

SĪTĀPARIṆAYAḤ.

Pages, 24. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 1581

Contains the first Sarga and breaks off in the 21st stanza of the second Sarga.

Same work as that described under R. No. 910(*a*) of the Triennial Catalogue of MSS., Vol. II.

No. **11821**. सीतापरिणयः.

SĪTĀPARIṆAYAḤ.

Pages, 38. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 9629.

Contains the Sargas four and five only.

Same work as the above.

No. **11822**. सीतापरिणयः.

SĪTĀPARIṆAYAḤ.

Substance, palm-leaf. Size, 16½ × 1⅝ inches. Pages, 8. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 81*b*. The other work herein is Sītāpariṇaya with commentary 1*a*.

Contains the fifth Sarga only.

Same work as the above.

End:

दिनद्राघीयस्त्वं द्युमणिकरतैक्ष्ण्यं दवशिखि-
द्रढीयस्त्वं दर्वीकरनिकरदुर्भिक्षमरताम्।
धुनीवेणीकार्श्यं दददतिदरिद्राणपवनः
तनीयस्त्वं तस्याः समचरदृतुः शुष्यदुदधिः ॥
इति नरनायकोऽपि सरयूनिकटात्प्रकटां
तपऋतुवैकरीमनुसरन्महिषीसहितः।
पुरमगमत्पुरन्दरपुरीसदृशं सुदृशां
नयनसरोजगर्भितगवाक्षततीं महतीम् ॥

olophon:

इति सूर्यनारायणाध्वरिविरचिते सीतापरिणये महाकाव्ये पञ्चमः सर्गः ॥

No. 11823 सीतापरिणयः.
SĪTĀPARIṆAYAḤ.

Substance, palm-leaf. Size, $15\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 30. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, fresh.

Contains from the 25th stanza to the end of the third Sarga and 68 stanzas in the fourth Sarga.

Same work as the above.

No. 11824. सीतापरिणयः, सव्याख्यः.
SĪTĀPARIṆAYAḤ WITH COMMENTARY.

Substance, paper. Size, $10\frac{3}{8} \times 8\frac{3}{8}$ inches. Pages, 244. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the Sargas one to five only.

Same work and commentary as those described under R. Nos. 910(*a*) and (*b*) respectively, wherein see for the beginning.

Sītāpariṇaya is a poem on the marriage of Sītā with Rāma, the hero of the Rāmāyaṇa. The poem is written in a simple and beautiful style and imitates the Raghuvaṁśa. The author as well as the commentator is Sūryanārāyaṇādhvarin. He is said to have been a native of the Salem district and flourished about two-hundred years ago.

End:

इति नरनायकोऽपि सरयूनिकटात्प्रकटां तपऋतुवैखरीमनुसरन्महिषीसहितः।
पुरीमगमत्पुरन्दरपुरीसदृशं सुदृशां नयनसरोजगर्भितगवाक्षततीं महतीम्॥

इतीति। इत्येवम्भूतां प्रकटां प्रसिद्धां तपऋतुवैखरीं श्रीष्मर्तुवैभवम्। ऋत्यक इति प्रकृतिभावः।

* * * *

पुरीमयोध्यानगरीम्। पूः स्त्री पुरीनगर्यौ वा पत्तनं पुटभेदनमित्यमरः। अगमत् गतवान्। गम्लृ गतौ इति धातोर्लुङि सी(ऌ)दित्वादङादेशः। उपमालङ्कारः। कनत्कुटकवृत्तम्। हयदशभिर्नजौ भजजला गु(गु)कनत्कुटकमिति लक्षणात्॥

Colophon:

इति सीतापरिणयव्याख्याने पञ्चमः सर्गः। इति सूर्यनारायणाध्वरिविरचिते सीतापरिणये महाकाव्ये पञ्चमः सर्गः॥

No. **11825.** सीतापरिणयः, सव्याख्यः.

SĪTĀPARIṆAYAḤ WITH COMMENTARY.

Pages, 162. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 11822.

Contains the first four Sargas complete. The extract given below forms part of the commentary on the 68th stanza of the fourth Sarga and is given again after the commentary on the 70th stanza. Stanzas 69 and 70 of the fourth Sarga are not found in their proper places, but are found at the end of the extract given below.

Same work as the above.

अस्मिन् श्लोके चक्रबन्धे अन्यवलये श्रीकान्त इत्ययं श्लोको लेखनीयः। अस्य पादचतुष्टयेऽपि प्रथमाष्टमाष्टमाक्षराणि श्रीसूक्तिरित्यस्य श्लोकस्य पादचतुष्टयाद्यन्तेषूपयोक्तव्यानि। श्रीसूक्तिरेति श्लोकं पादचतुष्टयमपि चतुःपङ्क्त्या लिखित्वान्तर्वलयचतुष्टयाक्षराणि पठितानि चेदयं श्लोको लभ्यते।

सूर्यनारायणकविः सुजनप्रियदायकम्।
चकार काव्यतिलकं सीतापरिणयाभिधम्॥

No. 11826. सुरेन्द्रचरितम्.
SURENDRACARITAM.

Pages, 126. Lines, 20 on a page.

Begins on fol. 1*a* of the MS. described under No. 11705.

Contains one to ten Sargas.

A poem describing the amorous sporting of Indra with the celestial damsels in pleasure gardens and ponds. The seduction of Ahalyā by Indra and the birth of an offspring as the result and the sporting of Paramaśiva and Pārvatī who metamorphosed themselves as elephants for that purpose and the birth of Gaṇeśa are also described herein.

Beginning:

श्रीवाणीशैलतनयादुर्गाज्येष्ठादिभेदतः ।
एकाप्यनेकरूपा सा भद्रा भद्रं ददातु वः ॥
नमोऽस्तु गुरवे तस्मै यो गोभिर्भानुमानिव ।
निरन्धीकुरुते लोकान् श्रीगृहामोदहेतुभिः ॥
यत्प्रसादाय यज्ञादि कुरु(र्व)ते कर्म मानुषाः ।
तं तद्विलासकथनैरभ्यर्चयितुमारभे ॥
भो भो बुधवरा लोके प्रसादं कुरुताधिमत् ।
आस्तां गिरः सफलता निवृत्तिः कथमन्यथा ॥
अनलप्रमुखाः सर्वेऽप्यनलं त्रिदिवौकसः ।
सम्यग्वर्णयितुं चित्रं यच्चरित्रमनन्तकम् ॥
तस्य त्रैलोक्यनाथस्य केवलं मानुषो हरेः ।
अनेडमूक आख्यातुं शक्तः कृत्स्नां कथं कथाम् ॥
तथापि गुरुशुश्रूषाबलेन वलविद्विषः ।
कथायास्तस्य लेशस्य लेशं वक्तुमुपक्रमे ॥
मूढोऽहं रूढमिन्द्रस्य वृन्तान्तं वक्तुमुद्यतः ।
यदत्र हेतुस्तद्वृत्तावैचित्र्यभ्रान्तचित्तता ॥
नीरसेनाप्यनेनेन्द्रो वचसा नः प्रसीदतु ॥

* * *

पुरा सह सहस्राक्षः सकलैः सुमनोगणैः ।
दुष्प्रलाभां दुराचारैरध्युवासामरावतीम् ॥

* * *

मनोनन्दनमारामं मनो नन्दनमीक्षितुम् ।
करोति स्म हरिः क्षेमं करोति स्मर एकदा ॥

* * * *

कल्याणमत्र गुरवस्तनुयासुरुच्चैरज्ञानसन्तमससन्त(त)लोकमित्राः ।
येषां कृपालववशेन मया प्रणीते सर्गोऽयमादिरगमन्मघवच्चरित्रे ॥

Colophon:

इति सुरेन्द्रचरिते प्रथमः सर्गः ॥

End:

मारीचो मुनिनायकः स भगवानादित्यगर्भे विधे-
रादेशादुदपीपदत् त्रिभुवनत्राणार्थिनो यं पुरा ।
मारीचान्तकमारणं पुनरसौ यश्चात्मजं सृष्टवान्
सोऽव्याद्वः सुरराडिदं निजकथासङ्कीर्तिसन्तुष्टधीः ॥
इन्दोर्बिम्बगतं मृगं मृगपतिर्दृष्ट्वा जिघृक्षुर्जवात्
यस्यारातिपरातितारसरणीप्रासादमासेदिवान् ।
तत्पाश्चात्यतलं विलोक्य विमलं चात्मानुबिम्बं ततः
मूढस्तं प्रति संपतत्यतिरुषा पायात्स वो वासवः ॥
निर्धूताः समराङ्कणाद्दितिसुताः प्राप्ता महत्काननं
यत्पाण्डुकृतपद्मजाण्डकयशःपूरानुलिप्तान् गजान् ।
आलोक्याभ्रमुकान्तिविभ्रमभृतः संभूतसम्भीतयः
तस्मादप्यतिविद्रवन्ति विवशाः सोऽयं हरिः पातु नः

* * * *

जगति यदनुकम्पालेशतः सिद्धसौख्याः कलितसकलकामाः पूरुषाः सम्भवन्ति ।
नतहृदि कृतकेल्या नस्तया भद्रकाल्या दलितदनुजपाल्या दीयतां दीर्घमायुः ॥
कल्याणमत्र गुरवस्तनुयासुरुच्चैः अज्ञानसन्तमससन्ततलोकमित्राः ।
यत्सेवयैव जनिते मम काव्यबन्धे सर्गः सुरेन्द्रचरिते दशमः समाप्तः ॥

Colophon:

इति सुरेन्द्रचरिते दशमः सर्गः ॥

No. 11827. राघवयादवपाण्डवीयव्याख्या.

RĀGHAVAYĀDAVAPĀṆḌAVĪYAVYĀKHYĀ.

Substance, palm-leaf. Size, 18¼ × 1½ inches. Pages, 152. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Incomplete. Some leaves are wanting.

Similar to the work described under No. 11705.

A commentary on the Rāghavayādavapāṇḍavīya of Cidambarakavi.

Beginning :

आनन्दसान्द्रत्वमजो विधत्तामनेकधामोदितविश्वभूतः ।
सत्यामृतो वः सकलेश्वरः श्रीरसावहो माननपद्महंसः ॥
. . . . इन्द्रादिदेवैर्नतमेव नत्वा ।
करोति किञ्चिन्मृदु काव्यरत्नं कथात्रयीशंसि चिदम्बराख्यः ॥
काव्येऽपि दभ्रे करुणारसेन सुधारसं सूक्तिविदो दधानाः ।
गुराविवार्थान् कतिचिद् गुणज्ञाः सम्भावयन्त्येव सतां रसज्ञाः ॥
मार्गे पदाङ्केऽपि महाकवीनां करोमि चाहं कतिचित् पदानि ।
करीन्द्रयाते कलभोऽपि मार्गे चरीकरीतीह न किं प्रचारम् ॥
पदैः सुहृद्यैः सुरसार्थपद्यैः माधुर्यमुद्भिर्मधुनो मनोज्ञः ।
उत्कै रसज्ञैरुपलालनीयो बालो हि वृद्धैरिव मे प्रबन्धः ॥
असावलङ्कारमनोहरो मे रसावहालोकरताशयस्य ।
भाषा भवत्वार्यजनस्य हृद्या योषा यथाश्लेषविशेषयुक्ता ॥
दशोत्तरैस्तु त्रिशतार्थपद्यैः मालामिवाब्जैर्मधुरोहयुक्तैः ।
सूक्तिं रसज्ञाः सुगुणां प्रणीतां कुर्वन्तु कण्ठे कुशलां ममैताम् ॥
अस्त्यञ्चितायामधुरा समानैरनेकशो भारतवासभूमिः ।
(परै)र्वैरालङ्करणैः प्रवीरैः पूर्हस्तिनामास्पदभूरयोध्या ॥
पुरीं पुरा तां श्रितशूरसेनां शशास शक्त्या . . . एव ।
. . . . पाण्डुः कीर्त्या हिमांशोः किल वंशधुर्यः ॥
कदाचिदुद्दाहवतो रतस्य कान्तारसध्यानगते कठोरात् ।
तपस्वतो हन्त कृतान्तमन्त्रः तस्याशयो . . . कं स तापः ॥
सोऽयं सुमित्रासु समः सुतार्थे तेपे स (भूयोऽ)जभुवा समेतः ।
परन्तपोऽथाप्तसुमन्त्रवार्तो धृत्या हिमाद्रीरमणः क्षमायाः ॥
मन्त्रस्य भूम्नेव वरस्य मन्युः महीसुराणां सहितः समाप्य ।
दमादिमानां भजनं धरेशो वध्वादरार्थं कलयाम्बभूव ॥
रामं सुदारं भरतं तपोजं भीमं श्रिया कृष्णमयं परेषाम् ।
यमौ यशस्वी नयनाभिरामौ सुतौ च लेभे स महानुभावः ॥
(रा)जन(श)ब्दैः सगुणैः सुजातैः स्वयं मुदा सावरजस्वभावैः ।
महीपतेस्तस्य मनोऽभिरामः तदा सुतोऽभूत् प्रिय एव कामम् ॥

स्वस्थे तु ताते प्रमदानुषङ्गात् सपौरवास्ते रतिमान्विनोदे ।
परन्तपोऽजो दरचत्र(क)पाणिरवाप यत् स्वागमवेद्यरूपम् ॥
प्रज्ञादृशा प्रापित एव पित्रा मात्राकुलाक्षाशयमीक्षितोऽयम् ।
प्रतापसन्तुष्टजनस्तपोभूस्थानं प्रपेदे तदनुव्रजन्द्राक् ॥

कुशलाः विचक्षणाः कण्ठे कुर्वन्तु धारयन्तु ; गुणस्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुष्विति निघण्टु । तुशब्दोऽवधारणे । अत्र श्लेषोपमयोरङ्गाङ्गिभावेन क्षीरेक्षुरसवत् सङ्करः ।

एवं प्रेक्षावतां प्रवृत्तिरुच्यर्थमुपोद्घातमवतार्य कथाः प्रस्तौति —अस्तीति । अश्वितायामधुरा अश्विता मनोहरा आयामस्य दैर्घ्यस्य धूः अतिशयो यस्याः सा तथा भारतवासभूमिः भारतानां भरतवंशभवानां वासभूमिः समानैः सगर्वैः करणैरन्तःकरणैः लक्षितैः प्रवीरैः श्रेष्ठैः अनेकशः परैः शत्रुभिः अयोध्या योद्धुमशक्या अलं वरा उत्तमा हस्तिनामास्पदभूः हस्तिनाम्नः आस्पदभूः अधिकरणभूमिः हास्तिनाख्येत्यर्थः पूः पुरी अस्ति ।

End :

पदं व्यवसितत्राणस्थानचिह्नाङ्किलक्ष्मरिति निघण्टुः । मधुरा . . . . . अयोध्यापुरी परार्घ्याः श्लाघ्याः चरा सञ्जाताः अस्येति परार्घ्यचरितम्.

---

2. LAGHUKĀVYA.

No. 11828. आर्यारामायणम्.
ĀRYARĀMĀYAṆAM.

Substance, palm-leaf. Size, $14\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 38. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1a. The other work herein is Kavirākṣasīya 20a.

A poem in Ārya metre dealing briefly with the story of the Rāmāyaṇa : by Paṇḍitasūrya.

Contains up to the end of the Yuddhakāṇḍa.

Beginning :

श्रीमुखसरसिजभृङ्गं शौरिं दनुजारिमखिललोकेशम् ।
श्रीवत्सकौस्तुभाङ्कं विष्णुं जगदेकनायकं वन्दे ॥

कौसल्यानयनेन्दुं दशरथहृदयारविन्दमार्तण्डम् ।
सीतामानसहंसं रामं राजीवलोचनं वन्दे ॥
तरणिकुलजलधिचन्द्रं दशरथतनयं धरासुताजानिम् ।
लक्ष्मणसहितं कलये करुणारसभरितलोचनं रामम् ॥
वाल्मीकिरचितविश्रुतरामायणदुग्धसागरं साधु ।
निर्मथ्य बुद्धिगिरिणा गृह्णाम्यार्यामृतं मधुरम् ॥
नारायणवरनाभीनलिने जातः पुरातनो धाता ।
तस्मान्मरीचिरुदभूत्प्रजापतिस्तस्य कश्यपः सूनुः ॥
कश्यपसूनुर्भानू राजा तरणेर्मनुस्तस्य ।
इक्ष्वाकुरभूत्तनयस्तज्जः कुक्षिर्विकुक्षिरस्य सुतः ॥
तस्मादभूत् ककुत्स्थः वृषवृषभारोहणाप्तविजयश्रीः ।
तस्य कुलजो दिलीपः शताश्वमेधः शशास साकेतम् ॥

* * * *

मधुमासशुक्लपक्षे जये नवम्यां कुलीरगे दितिभे ।
अथ बुधवारे रामः कौसल्यायां रमाधिपो जातः ॥

* * * *

पण्डितसूर्यस्य कृतावार्यारामायणेऽतिसङ्क्षिप्ते ।
श्रीबालकाण्डमेतत्पुण्यं पापापहारि सम्पूर्णम् ॥

End:

भरतादिसोदरैरथ मातॄर्नत्वाभवद्भरद्वाजम् ।
स वसिष्ठेन नगर्यां विजटः पट्टाभिषेकसिक्तः सन् ॥
पण्डितसूर्यस्य कृतावार्यारामायणेऽतिसङ्क्षिप्ते ।
श्रीयुद्धकाण्डमेतत्पुण्यं पापापहारि सम्पूर्णम् ॥

Colophon:

इत्यार्यारामायणे युद्धकाण्डः समाप्तः ॥

No. 11829. उद्धवदूतः.

UDDHAVADŪTAḤ.

Substance, paper. Size, 13⅜ × 8¼ inches. Pages, 22. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 94b. The other works herein are Rukmiṇīpariṇa-ya 1a, Uddhavasandēśa 81a, Haṁsasandēśa 110a, Padāṅkadūta 125b.

Complete.

A poem containing 141 stanzas in which Kṛṣṇa, while he was at Mathurā, is described as having conveyed through his friend, Uddhava, his welfare and well-being to the Gōpīs at Gōkula who were distressed at their separation from him.

Beginning:

गोपीबन्धोरनवधिकृपादाक्ष्यदाक्षिण्यसिन्धो-
रादेशेन प्रणयपटुना प्रापितं गोकुलाय ।
गोधुग्वृन्दव्यसनविसरालोकदुस्स्थं रहस्स्थं
मध्येकृत्य प्रियसहचरीमुद्धवं काचिदूचे ॥ १ ॥
कस्त्वं साधो कुवलयदलश्यामविस्तीर्णदृष्टे
दृष्टे सद्यो भवति भवति स्निग्धमत्यन्तमन्तः ।
किं वा प्रश्नैरहह मधुरानाथभुक्तं तदेत-
द्धत्ते मौलौ कनककपिशं सौरभोद्गारि वासः ॥ २ ॥

End:

आमन्त्र्यैकस्तदनु सकलं घोषमुत्कण्ठमानः
सद्यो राधारमणचरणप्रेक्षणाय प्रतस्थे ।
मन्त्रं चिन्तामणिमिव परा चिन्तयन्ती चिराय
प्रेयस्सूक्तं वनभुवि घनानन्दमग्नावतस्थे ॥ १३९ ॥
नानारामप्रणयिषु मनस्सङ्गसौभाग्यभाजा
जाड्यापाये सुरभिसमयस्थायिना माधवेन ।
राधाबन्धोरुपहृतामिति प्रेममाध्वीकमेत-
न्निर्विघ्नेन श्रवणपुटकैः पुण्यवन्तः पिबन्तु ॥ १४० ॥
विचारपारदृश्वानः कृतं कृशधिया मया ।
करुणार्द्राः करिष्यन्ति शुद्धमुद्धवदूतकम् ॥ १४१ ॥

No. 11830. उद्धवसन्देशः.

UDDHAVASANDEŚAḤ.

Pages, 28. Lines, 20 on a page.

Begins on fol. 81*a* of the MS. described under the previous number.

Complete in 131 sta[illegible]

Similar to the above[illegible]

697

Beginning :

सान्द्रीभूतैर्नवविटपिनां पुष्पितानां विताने-
र्लक्ष्मीवत्तां दधति मधुरापत्तने दत्तनेत्रः ।
कृष्णः क्रीडाभवनवलभीमूर्ध्नि विद्योतमानो
दध्यौ सद्यस्तरलहृदयो गोकुलारण्यमैत्रीम् ॥ १ ॥
श्वासोल्लासैरथ तरलितः स्थूलनालीकमालः
कुर्वन्पूर्णानयनपयसां चक्रवालैः प्रणालीः ।
स्मारं स्मारं प्रणयनिबिडां वल्लवीकेलिलक्ष्मीं
दीर्घोत्कण्ठाजटिलहृदयस्तत्र चित्रायितोऽभूत् ॥ २ ॥
अन्तः स्वान्ते क्षणमथ परामृश्य पाराभिलाषी
कष्टाम्भोधेर्भवनशिखरे कुट्टिमान्तर्निविष्टः ।
सोत्कण्ठोऽभूदभिमतकथां शंसितुं कंसभेदी
नेदिष्ठाय प्रणयलहरीबद्धवागुद्धवाय ॥ ३ ॥

End :

श्रीदामाद्यैश्शिशुसहचरैर्बाल्यखेलामकार्षी-
द्गोपालीभिः सह युवतिभी रासकेलीं चकार ।
दुष्टान्दैत्यानपि बहुतरान् हेलया यो जघान
स श्रीकृष्णस्तरुणकरुणस्तारयेद्वो भवाब्धिम् ॥ १३१ ॥

Colophon :

इत्युद्धवसन्देशाख्यः प्रबन्धः समाप्तः ॥

No. **11831.** ऋतुसंहारः.

ṚTUSAṀHĀRAḤ.

Pages, 33. Lines, 20 on a page.

Begins on fol. 431*a* of the MS. described under No. 1800.

Complete.

This is one of those poems generally attributed to Kālidāsa. It describes the six seasons of a year with special reference to the sentiment of love.

Beginning :

प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः सदावगाहक्षतवारिसञ्चयः ।
दिनान्तरम्योऽभ्युपशान्तमन्मथो निदाघकालः समुपागतः प्रिये ॥
निशाः शशाङ्कक्षतनीलराजयः क्वचिद्विचित्रं जलयन्त्रमन्दिरम् ।
मणिप्रकाराः सरसं च चन्दनं शुचौ प्रिये यान्ति जनस्य सेव्यताम् ॥

End:

छायां जनः समभिवाञ्छति पादपानां नक्तं तथेच्छति पुनः किरणं सुधांशोः ।
हर्म्यं प्रयाति शयितुं सुखशीतलं च कान्तां च गाढमुपगूहति शीतलत्वात् ॥
मलयपवनविद्धः कोकिलेनाभिरम्यः सुरभिमधुनिषेकाल्लब्धगन्धप्रबन्धः ।
विविधमधुपयूथैर्वेष्ट्यमानः समन्तात् भवतु तव वसन्तः श्रेष्ठकालः सुखाय ॥

Colophon:

इति श्रीकालिदासकृतौ ऋतुसंहारकाव्ये वसन्तवर्णना समाप्ता ॥

No. 11832. किरातप्रबन्धः.
KIRĀTAPRABANDHAḤ.

Substance, Śrītāla. Size, 6 × 1⅝ inches. Pages, 5. Lines, 8 on a page. Character, Malayāḷam. Condition, good. Appearance, new.

Begins on fol. 20*a*. The other works herein are Kṛṣṇaprabandha 1*a*, Santānagōpālaprabandha 23*a*, Pāñcālīsvayaṁvara 28*a*.

Incomplete.

A poem describing the combat between Śiva, disguised as a hunter, and Arjuna in the course of his severe penance for obtaining the divine missile, Pāśupatāstra.

Beginning:

रे क्षुद्रात्मन् किरात श्वगणपरिवृतः क्षुल्लकैः सार्धमेभिः
मार्गन् मार्गाण्यभीक्ष्णं गिरितटभुवि नो वेत्सि वृत्तानि राज्ञाम् ।
अज्ञात्वा तत्त्वतो माममरपुरवधूगीयमानापदानं
युद्धायासि प्रवृत्तः फलमनुभव चास्याविवेकस्य सद्यः ॥
रे क्षुद्र क्षितिपतिवंशकीट साक्षात् कर्तारं जगदवगच्छ साम्प्रतं माम् ।
यद्वंशं व्यपदिशसि स्फुटं तमेनं जानामि प्रकटकलङ्कवंहिमानम् ॥

End:

रे रे मांसिकपाश यत्त्वमधुना चन्द्रस्य वन्द्यं कुलं
साक्षान्निन्दसि गर्हसे यदपि नः सर्वं तदेतत्सहे ।
यत्त्वेवं त्रिपुरद्रुहो भगवतः कुत्सां विधित्सेतरां
तच्छ्रोतारमहो धिगद्य बत मां धिग् गाण्डिवं हा शरान् ॥
अथ भिल्लमल्लकुरुवल्लभावुभौ परिफुल्लभल्लकुलशल्यपल्लवैः ।
स्वगितावलोकसरणिं दिवौकसां समरं भयङ्करमयं वितेनतुः ॥

No. 11833. कृष्णविलासः.
KṚṢṆAVILĀSAḤ.

Substance, palm-leaf. Size, 9⅝ × 1¼ inches. Pages, 84. Lines, 9 on a page. Character, Malayāḷam. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Kumārasambhava 43*a*.

Complete in six Sargas.

Same work as that described R. No. 85(*c*) of the Triennial Catalogue of MSS., Vol. I, wherein see for the beginning.

End:

एकेन पाणिकमलेन दधौ सलीलं यः सप्तरात्रमचलन्नचलं महान्तम् ।
देवः स एव सुरसिद्धगणेन मुक्तं वोढुं प्रसूननिचयं न शशाक मूर्ध्ना ॥
[नीराजनः ।
इति मदमपनीय वृत्रद्विषस्तस्य दामोदरो मुदितनिखिलगोपनारीजनारब्ध-
पवनकेतुमालाकुलोत्तुङ्गसौधं निजं सुरयुवतिसहस्रगीतापदानः प्रपेदे पदम् ॥

Colophon:

इति श्रीकृष्णविलासे षष्ठः सर्गः ॥

No. 11834. कृष्णविलासः.
KṚṢṆAVILĀSAḤ.

Substance, palm-leaf (Śrītāla). Size, 10⅛ × 1⅞ inches. Pages, 83. Lines, 4 on a page. Character, Malayālam. Condition, slightly injured. Appearance, old.

Contains the Sargas one to four complete.

Same work as the above.

No. 11835. कोकिलसन्देशः.
KŌKILASANDĒŚAḤ.

Substance, paper. Size, 8⅝ × 5½ inches. Pages, 83. Lines, 8 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 45*b*. The other works herein are Bhṛṅgasandēśa 1*a*, Bāṇāsurayuddhaprabandha 88*a*.

Complete.

A love-poem written after the manner of the Mēghasandēśa of Kālidāsa. Herein the lover sends his message to his beloved in the Kērala country through a cuckoo. The author is Uddaṇḍakavi, son of Bhaṭṭa Raṅganātha and grandson of Gōkulanātha and a native of Lāḍapura, a

village on the banks of the Pālār in the North Arcot district. This poem is said to have been written in response to a similar poem named Bhṛṅgasandēśa written and sent to the author by Vāsudēvanambūri, a poet in the court of Ravivarma and Gōdavarma who ruled at Calicut.

Beginning :

सौधे तुङ्गे सह दयितया कोऽपि संक्रीडमानः
प्राप स्वापं परमपुरुषः शेषभोगे श्रियेव ।
चित्रा दैवी गतिरियमसौ शैलजामण्डितायां
काञ्च्यां कम्पातटभुवि तयानन्वितो बुध्यते स्म ॥

* * * *

तत्र द्वित्रान् प्रियसहचरीविप्रयोगातिदीर्घान्
कामार्तोऽयं शिव शिव समुल्लङ्घ्य मासान् कथंचित् ।
चैत्रारम्भे समुदितमधुश्रीकटाक्षाभिरामं
चूताङ्कूरास्वदनरसिकं कोकिलं तन्ददर्श ॥

* * * *

गन्तव्यस्ते त्रिदिवविजयी मङ्गलाग्रेण देशः
प्राप्तः ख्यातिं विहिततपसः प्राग् जयन्तस्य नाम्ना ।
पारे चूर्ण्याः परिसरसमासीनगोविन्दवक्षो-
लक्ष्मीवीक्षाविवलितसुधाशीतलः केरलेषु ॥

* * * *

मुक्ताजालैर्धवलपुलिनं वीचिमालाविकीर्णैः
कूलाध्वानं कुसुमितकु(त)रुस्निग्धमालम्बमानः ।
देशाद्देशं व्रजसि कुतुकोत्तानमुग्धाङ्गनानां
वामाक्षीणां नयनपुलकैः सादरं पीयमानः ॥
कुर्यात् प्रीतिं तव नयनयोः कुक्कुटक्रोडनाम
प्रासादाग्रोल्लिखितगगनं पत्तनं तत्प्रतीतम् ।
यद्दोर्वीर्यद्रढिमकरदीभूतराजन्यवीराः
शूरांमण्यश्शिखरिजलधिस्वामिनं(नः)पालयन्ति ॥

End :

एतत्कृत्यं प्रियसख मम भ्रातुरार्तस्य कृत्वा
नासीरः स्या जगति करुणाशालिनां संविभागे ।

शंसन्ति त्वां ननु परभृतं शैशवे यद्भृतोऽन्यैः
पत्रिव्राताभरण भरणेनाद्य सत्यं परेषाम् ॥
एवं तस्या विरहविधुरं जीवितं स्थापयित्वा
गच्छ स्वेच्छाविहरण यथाप्रार्थितं दिग्विभागम् ।
धन्यश्रीः स्यान्मदननृपतेः कोकिला तेऽनुकूला
भूयान्मैवं सकृदपि तया विप्रयोगप्रसङ्गः ॥

Colophon:

इत्युत्तरसन्देशः ॥

No. **11836.** क्षत्रचूडामणिः.

KṢATRACŪḌĀMAṆIḤ.

Substance, paper. Size, $13\frac{1}{8} \times 8\frac{1}{4}$ inches. Pages, 27. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 103*a*. The other works herein are Rājaśekharacarita 1*a*, Uttararāmāyaṇacampu 73*z*.

Contains the first five Lambas complete.

This is a short poem relating the story of a Jaina king named Satyandhara. By Vādībhasiṁhasūri.

Beginning:

श्रीपतिर्भगवान् पुष्याद्भक्तानां वः समीहितम् ।
यद्भक्तिः शुल्कतामेति मुक्तिकन्याकरग्रहे ॥
संक्षेपेण प्रवक्ष्यामि चरितं जीवकोद्भवम् ।
पीयूषं न हि निश्शेषं पिबन्नेव सुखायते ॥
श्रेणिकप्रश्नमुद्दिश्य सुधर्मो गणनायकः ।
यथोवाच मवा(या)प्येतदुच्यते मोक्षलिप्सया ॥
इहास्ति भारते खण्डे जम्बूद्वीपस्य मण्डने ।
मण्डलं हेमकोशाभं हेमाङ्गदसमाह्वयम् ॥
तत्र राजपुरी नाम राजधानी विराजते ।
राजराजपुरीसृष्टौ स्रष्टुर्या मातृकायते ॥
तस्यां सत्यंधरो नाम राजाभूत् सत्यवाङ्मयः ॥
वृद्धसेवी विशेषज्ञो नित्योद्योगी निराग्रहः ॥
महिता महिषी तस्य विश्रुता विजयाख्यया ।

End :

पूज्या अपि स्वयं सन्तः सज्जनानां हि पूजकाः ।
पूज्यत्वं नाम किं नु स्यात् पूज्यपूजाव्यतिक्रमे ॥
प्राज्ञेषु प्रह्वतावश्यमात्मवश्येप्सिता मता ।
प्रह्वतापधनुष्काणां कार्मुकस्यैव का मुदा ॥
वपुर्वीक्षणमात्रेण निरणाय्यस्य वैभवम् ।
वपुर्वक्ति हि माहात्म्यं विदौरात्म्यमतद्विदाम् ॥

Colophon :

इति श्रीमद्वादीभसिंहसूरिविरचिते क्षत्रचूडामणौ पञ्चमो लम्भ संपूर्णः ॥

No. 11837. खरवधः.

KHARAVADHAḤ.

Substance, paper. Size, 11 × 9 inches. Pages, 63. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 57*a*. The other work herein is Kamalinīrājahaṁsa 1*a*.

Complete.

A poem dealing with the defeat and destruction of Khara in the battle field by Rāma.

Beginning :

रामः सोमामितानन्ददनिजवदनो मैथिलीरूपलक्ष्मी-
रामारामप्रदायी सततमुरुगुणो भ्रातृसौमित्रियुक्तः ।
चण्डीशाच्यों मुनीन्द्राद्यवमकृतिरतो दण्डकारण्यके वे-
तण्डाधीशस्य मुक्तिप्रद उत विबभौ चण्डकोदण्डधारी ॥
कोटिकन्दर्पलावण्यकूटचित्तानुरञ्जकः ।
कोटीरवद्धातजटः पाटितात्युग्रताटकः ॥
एणचर्मानन्दमयमेणाङ्कापीडवन्दितः ।
वसानः सुन्दरतरे वासुदेवः कटीतटे ॥

End :

बाणः श्रीराममुक्तो जगदखिलमिदं भासयन् स्वप्रभाभिः
भक्तैर्देवोत्तमैरप्यतिसमयमसौ वीक्षितः पद्मजाद्यैः ।

नानानिर्घातलक्षाधिकविपुलबलो दुर्निरीक्ष्यो जनौघैः
वक्षोभागे खरस्य प्रतिभटभयदो घोरघोरं पपात ॥

कल्पान्तकालानलसन्निभोऽयं कालारिदत्तोरुवरस्य तस्य ।
ददाह देहं क्रमशः प्रवृद्धः हेतीश्वरोऽयं किल रामबाणः ॥

* * * *

इत्युक्ता ब्रह्ममाता मृतिजनिरहिता दोषलेशैर्विहीना
रामं पाद्मस्य तातं गुणगणजलधिं सर्वदोषातिदूरम् ।
सङ्ख्यातीताङ्गजन्याकृतिचणवरसौन्दर्यवारान्निधिं तं
लक्ष्मीः सीताभिधाना स्वपतिममितधीरालिलिङ्गे प्रहृष्टा ॥
श्रीरामो निखिलर्षिसङ्घसुखकृत्तत्रावसत् स्वाश्रमे
सीताहृरतसुलालिताङ्घ्रिकमलः सौमित्रिणा स्वर्चितः ।
लक्ष्मीरूपगुणाढ्यचारुसदनेऽनन्तासने स्वे पुरे
लक्ष्मीहस्तसुलालिताङ्घ्रिकमलः श्रीशो हि यः स ह्ययम् ॥

Colophon:

इति खरवधकाव्यं समाप्तम् ॥

No. **11838**. गोविन्दचरित्रम्.

GŌVINDACARITRAM.

Substance, palm-leaf. Size, $6\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 120. Lines, 5 on a page. Character, Malayāḻam. Condition, slightly injured. Appearance, old.

Complete.

Same work as that described under R. No. 76 of the Triennial Catalogue of MSS., Vol. I.

A poem in ten Sargas on God Kṛṣṇa by Vāsudēva, a poet, who praises a king of the Malayāḷa country by name Ravivarma.

End:

एवं स भगवान्विष्णुरवतार्य भुवो भरम् ।
स्थापयन् परमं धर्मं ररक्ष सकलं जगत् ॥ ४६ ॥
सान्निध्यं यत्र नित्यं त्रिजगति नगरे तत्र य(हि)द्वारवत्या-
मातिष्ठन् सम्यगर्थत्रयममलमनोहारिकल्याणकीर्तिः ।
पुत्रैर्मित्रैः कलत्रैर्गुरुभिरनुचरैः सार्धमन्यैश्च धन्यैः
रेमे विश्वैकनाथो जननयनसमापीयमानाङ्गलक्ष्मीः ॥ ४७ ॥

Colophon:

इति गोविन्दचरिते दशमः सर्गः ॥ गोविन्दचरितं समाप्तम् ॥

No. 11839. घटकर्परीयम्.
GHAṬAKARPARĪYAM.

Pages, 6. Lines, 18 on a page.

Begins on fol. 518*a* of the MS. described under No. 1800.

A small Yamaka poem describing the pangs of separation of the beloved from the lover in the rainy season. In the colophon it is stated that the author was Ghaṭakarpara. See No. 3792 on page 1427 of the India office Library Catalogue, wherein the work is attributed to Kālidāsa.

Complete.

Beginning:

निचितं खमुपेत्य नीरदैः प्रियहीनाहृदयावनीरदैः ।
सलिलैर्निहितं रजः क्षितौ रविचन्द्रावपि नोपलक्षितौ ॥
हंसा नदन्मेघभयाद्द्रवन्ति निशामुखान्यद्य न चन्द्रवन्ति ।
नवाम्बुमत्ताश्शिखिनो नदन्ति मेघागमे कुन्दसमानदन्ति ॥

End:

एतान्निशम्य विरहानलपीडितायास्तस्या वचः खलु दयालुरपीडितायाः ।
स्वं स्वारवेण कथितं जलदैरमोघैः प्रत्याययौ सदनमूनदिनैरमोघैः ॥
आलम्ब्य चाम्बु तृषितः करकोशपेयं भावानुरक्तवनितासुरतैः शपेयम् ।
जीयेय येन कविना यमकैः परेण तस्मै वहेयमुदकं घटकर्परेण ॥

Colophon:

इति श्रीघटकर्परकविकृतं यमककाव्यं समाप्तम् ॥

No. 11840. घटकर्परीयम्.
GHAṬAKARPARĪYAM.

Substance, palm-leaf. Size, $17\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 4. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Śṛṅgāratilaka 2*b*.

Complete.

Same work as the above.

No. 11841. घटकर्परीयम्, सव्याख्यानम्.
GHAṬAKARPARĪYAM WITH COMMENTARY.

Pages, 16. Lines, 14 on a page.

Begins on fol. 1*a* of the MS. described under No. 11318.
The commentary is by Śaṅkarakavi.
Complete.

Beginning:

निचितं खमुपेत्य नीरदैः प्रियहीनाहृदयावनीरदैः।
सलिलैर्निहितं रजः क्षितौ रविचन्द्रावपि नोपलक्षितौ ॥

क्रियते घटकर्परस्य टीका विदुषा शङ्करभक्तशङ्करेण।
शिवमङ्गलमूर्तिकामलक्ष्मीं सततं सूर्यमजं गुरुं च नत्वा॥

अत्र वस्तुनिर्देशात्मकं मङ्गलमस्ति। अथ पञ्चभिः श्लोकैः कुलकमाह। तल्लक्षणं तु "द्वाभ्यां युग्ममिति प्रोक्तं त्रिभिः कुल(श्लोकै)र्विशेषकम्। कालाभ्यं (पकं) चतुर्भिः स्यात्तदूर्ध्वं कुलकं स्मृतम्" इति [लक्षणात्]। तत्र काचिद्वयस्य प्रोषितभर्तृकां नायिकां प्रति वदति। तत्र द्वितीयश्लोकस्थं सम्बोधनमत्र ग्राह्यम्। निचितमिति। हे कुन्दसमानदन्ति। नीरदैर्मेघैरुपत्येयागत्य खमाकाशम् "खमिन्द्रियेषु खे स्वर्गे" इति विश्वः। निचितं व्याप्तम्। अस्तीति शेषः। कथम्भूतैर्नीरदैः। प्रियहीनाहृदयावनीरदैः। प्रियेण हीना तस्याः हृदयं वक्षः; "हृदयं वक्षसि स्वान्ते" इति विश्वः। तदेव अवनी पृथिवी [घटखं दपे]दंती (रदन्ति) लिखन्ति पीडयन्ति ते प्रियहीनाहृदयावनीरदास्ते। किञ्च सलिलैर्जलैः क्षितौ पृथिव्याम्। रजः धूलिः। "रेणुर्द्वयोः स्त्रियां धूलिः पांसुर्ना न द्वयो रजः" इत्यमरः। निहितं स्थापितम्। "आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम्" इत्यमरः। किं च रविचन्द्रावपि हंसग्ला(वा)वपि। नोपलक्षितौ न दृष्टौ। जनैरिति शेषः। मेघैराच्छि(च्छ)न्नत्वादित्यर्थः। अस्मिन् श्लोके वैतालिकं छन्दः। "न समात्र परा किल(कला)वैतालीयेऽन्ते बलो(रलौ)गुरुः" इति लक्षणात्॥ १॥

End:

पातुं योग्यं पेयम्। अम्बु पयः। आलम्ब्य करे धृत्वा। किंविधः अहम्। तृषितः; पयस्सु तृट् सञ्जाता यस्य सः, जलं पातुमिच्छन्नित्यर्थः। वसन्ततिलका छन्दः॥

Colophon:

इति श्रीकालिदासकृते घटखर्परकाव्ये टिप्पणं समाप्तिमगमत्॥

No. 11842. घटकर्परीयम्, सव्याख्यानम्.
GHAṬAKARPARĪYAM WITH COMMENTARY.

Pages, 13. Lines, 6 on a page.

Begins on fol. 10*b* of the MS. described under No. 1277.

Complete in 22 stanzas.

The text is the same as the above and the commentary is by Tārācandra.

Beginning :

निचितं खमुपेत्य नीरदैः प्रियहीनाहृदयावनीरदैः ।
सलिलैर्निहितं रजः क्षितौ रविचन्द्रावपि नोपलक्षितौ ॥

प्रोषितप्रमदयेदमुच्यते इति षष्ठश्लोकेनान्वयः । प्रोषितप्रमदया विदेशगतभर्तृकया सख्या अग्रत इदं वक्ष्यमाणमुच्यते । निचितमित्यादि वक्ष्यमाणं चोच्यते । हे सखि । कीदृशी । कुन्दसमानदन्ति । कुन्दपुष्पवत्तत्समाना दन्ता यस्याः सा तस्याः सम्बोधनम् । निचितं व्याप्तम्, आच्छन्नं वा । किम् । खं आकाशम् । कैः । नीरदैः । किम्भूतैः । प्रियहीनाहृदयावनीरदैः । प्रियेण वल्लभेन हीना प्रियहीना । तस्या हृदयं चित्तम् । तदेवावनिः (नी) भूमिः । तां रदन्ति विदारयन्ति तैः । रद विलेखने । किं कृत्वा । [निचित्य] उपेत्य आगत्य । तत्सलिलैर्जलैः निहितं स्थापितम् । किं तत् । रजः धूलिः । कस्याम् । क्षितौ भूमौ । रविचन्द्रावपि नोपलक्षितौ मेघैराच्छादितत्वान्न दृष्टौ ।

End :

भावानुरक्तवनितासुरतैः शपेयमालम्ब्य चाम्बु तृषितः करकोशपेयम् ।
जीयेय येन कविना यमकैः परेण तस्मै वहेयमुदकं घटकर्परेण ॥

येन परेण कविना यमकैर्जीयेय तस्मै क(घ)टकर्परेणाहमुदकं वहेयम् ; तस्य किङ्करो भवेयमित्यर्थः । यद्यहं जीयेय एतां प्रतिज्ञां दृढीकर्तुं शपथद्वयं प्राह कविः । भावानुरक्तवनितासुरतैः शपेयम् । इङ्गितप्रीतकान्ताविलासैः । यदि प्रतिज्ञातं पालयति । तृषितः पिपासितः । करकोशपेयं हस्ते पातव्यमम्बु जलं चा(लम्ब्य)प्राप्य । शपेयं शपथं कुर्याम् ॥ २२ ॥

ताराचन्द्राभिधेयेन बालव्युत्पत्तिहेतवे ।
घटकर्परटीकेयं संशोध्य प्रकटीकृता ॥

No. 11843. नलोदयः.
NALŌDAYAḤ.

Substance, palm-leaf (Śrītāla). Size, 10⅝ × 1⅜ inches. Pages, 34. Lines, 7 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Contains the Āśvāsas one to four complete.

An alliterative poem describing the leading incidents in the life of Nala. In the colophon it is stated that the author is Kālidāsa.

Beginning:

हृदय सदा यादवतः पापाटव्या दुरासदाया दवतः ।
अरिसमुदायादवतस्त्रिजगन्मा गाः स्मरेण दायादवतः ॥
योऽजनि ना गोपीतश्चचार यो वल्लवाङ्गनागोपीतः ।
भूर्येनागोपीतः कंसाद्यो द्वेषमेव नागोऽपीतः ॥
यदरिषु सन्ना मानस्थितयो यन्नुन्नमुदलसन्नामानः ।
यत्र ससन्नामा न स्युर्भवभाजश्च पठितसन्नामानः ॥
समनिन्दानवना शं जनतालिकुलं यथैव दानवनाशम् ।
द्विरदाद्दानवनाशं जगच्च लभते यतः सदानवनाशम् ॥
अस्ति स राजा नीते रामाख्यो यो गतीः परा जानीते ।
यस्य रराजानीते रत्नानि जनः कुले धराजानीते ॥
यः सेनानावारिप्रकरनदीः शरमयं धुनाना वारि ।
अतरन्ना नावारि व्यसनैर्यद्भुवि वनं च नानावारि ॥

End:

तदरातिघटा च वनेषु शुचा पदमापदमाप दमापदमा ।
सुखदं च जनाय यथैव हरिं यतमायतमाय तमायत मा ॥
पुरेव पुर्यतायतायतायता पुरेव सा ।
सदायमुन्महा महामहामहास्त सम्पदम् ॥

Colophon:

इति कालिदासस्य कृतौ नलोदये महाकाव्ये चतुर्थाश्वासः ॥

No. 11844. नलोदयः.
NALŌDAYAḤ.

Pages, 7. Lines, 18 on a page.

Begins on fol. 512a of the MS. described under No. 1800.

Contains the first Āśvāsa.

Same work as the above.

No. 11845. नलोदयः.

NALŌDAYAḤ.

Substance, palm-leaf. Size, 15⅝ × 1¼ inches. Pages, 23. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Nalōdayavyākhyā 13*a*.

Contains the Āśvāsas one to four.

Same work as the above.

No. 11846. नलोदयः, सव्याख्यः.

NALŌDAYAḤ WITH COMMENTARY.

Substance, paper. Size, 9⅜ × 7½ inches. Pages, 62. Lines, 19 on a page. Character, Telugu. Condition, good. Appearance, new.

Breaks off in the second stanza of the third Āśvāsa.

Same poem as the above.

The commentary is attributed to Kōlacala Mallināthasūri. The commentary first gives the Padacchēda of each stanza and then the meaning.

Beginning:

श्रीलक्ष्मीकुचकोकालिकेलिकासारवक्षसम् ।
प्रह्लादाह्लादनैकाग्रं श्रीनृसिंहमुपास्महे ॥
दमयन्तीं नलं भीमं कर्कोटकमहीश्वरम् ।
ऋतुपर्णं च राजर्षिं पठेद्ध्यात्वा नलोदयम् ॥
हृदय सदा यादवतः पापाटव्या दुरासदाया दवतः ।
अरिसमुदायादवतः त्रिजगन्मा गाः स्मरेण दायादवतः ॥

हृदय । सदा । यादवतः । पापाटव्याः । दुरासदायाः । दवतः । अरिसमुदायात् । अवतः । त्रिजगत् । मा । गाः । स्मरेण । दायादवतः ।•

व्याख्यानम्—

हे हृदय हे चेतः । त्वम् । दुरासदायाः दुष्प्रापायाः । पाप हेत(प)व अटवी अरण्यं तस्याः । दवः दवाग्निः ; पञ्चम्यास्तसिल् ; दवतः । अरीणां शत्रूणां समुदायात् समूहात् । त्रयाणां जगतां समाहारस्त्रिजगत् ।

लोकत्रयम् । अवतः रक्षतः । स्मरेण मन्मथेन । दायादः सुतः अस्यास्तीति दायादवान् पुत्रवान् तस्मात् । यदोरपत्यं पुमान् यादवः; पञ्चम्यास्तसिल्; यादवतः श्रीकृष्णात् । सदा सततम् । मा गाः मा गच्छ । तस्मिन्नेव रमस्वेत्यर्थः ॥

Colophon :

इति श्रीकालिदासकृतौ नलोदये महोपाध्यायकोलचलमल्लिनाथसूरिविरचितायां नलोदये(य)व्याख्यायां प्रथमाश्वासः ॥

End :

अद्य इदानीम् । अमितया अपरिमितया । स्पृहया वाञ्छया । तदधिगमाय दमयन्ती.

No. **11847.** नलोदयः, सव्याख्यः.

NALŌDAYAḤ WITH COMMENTARY.

Substance, paper. Size, 11½ × 7 inches. Pages, 172. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete in four Ucchvāsas.

The text is by Kālidāsa and the commentary called Subōdhinī is stated to have been written, while young, by Maithila Prajñākarasūri, son of Mahōpādhyāya Vidyākara and grandson of Mahōpādhyāya Miśrānandakara of Puṇyagrāma (Poona ?). The original of this MS. is said to have been written in lithograph in Śaka 1735

Beginning :

कङ्कणफणिराजमणिं दीपधिया वदनमारुतैरसकृत् ।
निर्वापयति कुमारे सगिरिसुतो जयति सस्मितः शम्भुः ॥

नलोदयस्य सहसा दुरूहस्य सुबोधिनीम् ।
क्रियमाणस्य मे कुर्वद्रूपोऽस्तु शरणं शिवः ॥

हृदय सदा यादवतः पापाटव्या दुरासदाया दवतः ।
अरिसमुदायादवतस्त्रिजगन्मा गाः स्मरेण दायादवतः ॥

तत्रभवान् कालिदासः प्रारिप्सितग्रन्थसमाप्तिप्रतिबन्धकविघाताय श्रीकृष्णस्मरणरूपमङ्गलमादौ निबध्नाति—हृदयेति । हे हृदय अन्तःकरण । यादवतः यादवात् । पञ्चम्यास्तसिल् । त्वं मा गाः मा गच्छेः । कथम्भूतात् । पापाटव्याः पापारण्यात् । दुरासदायाः दुःखेन सोढुं शक्यायाः । दवतः दवाग्नेः । अरिसमुदायाच्छत्रुसमूहात् । त्रिजगत् त्रैलोक्यम् । सदा अवतः पालयतो रक्षतो वा । यद्वा । कीदृशाद्यादवतः । दुस्सोढा या पापाटवी तस्या

दवाग्नेरिति रूपकम् । पुनः कीदृशात् । अरिसमूहात् त्रैलोक्यमवत इति । पुनः कीदृशात् । स्मरेण कामेन । दायादवतः पुत्रवतः । "दायादौ सुत-बान्धवौ" इत्यमरः ।

End :

नलेन पुर्येतायतायतायता पुरेव सा ।
सदायमुन्मह्वा महामह्वामहास्त सम्पदम् ॥

अथाशीर्वादव्याजेन नलोदयकाव्यसमाप्तिं सूचयति—नलेनेति । नलेन नैषधेन । सा पुरी स्वीया नगरी । पुरेव पूर्वमिव । अतायत विस्तारिता । कीदृशी पुरी । अयतायता । अयः शुभदैवम् । नलस्येति शेषः । तस्य भावोऽयता । तया । आयता विशाला । यदा राज्ञो नलस्य शुभदैवमभूत्तदा यथापूर्वं स्वनगरी विशालाभूदिति भावः । यद्वा । कीदृशेन नलेन । अयतायता । अयेन शुभदैवेन तायति पालयति, देवब्राह्मणादीनिति शेषः । अयतायन्, तेन । यद्वा अयं तायति विस्तारयति, तेन । सर्वदा स्वशुभशंसकेन । तायृ सन्तानपालनयोरित्यस्मात्कर्तरि शता । यद्वा अयो विद्यते यस्यासौ "अर्शआदिभ्योऽच्" इत्यच् । तस्य भावोऽयता शुभदैववत्त्वम् । तमेति प्राप्नोतीत्ययतायन्, तेन । इण् गतौ; कर्तरि शतरि इणो यणिति यण् । अयं नलः । उन्मह्वा उद्धततेजाः । सदा सर्वकालम् । सम्पदम् लक्ष्मीम् । अह्वास्त प्राप । कीदृशीं सम्पदम् । महामह्वाम् । महान्तो मह्वा उत्सवाः यस्यां सा ताम् । सदैवोत्सवपरिपूर्णां सम्पदं लेभे इति भावः । अतायतेति । तनु विस्तार इत्यस्माद्धातोः कर्मणि लट् । आत्मनेपदे ते परे यकि च कृते तनोतेर्यकीति विकल्पेनात्वे च रूपम् । अह्वास्तेति । ओ ह्वाङ् गतौ इत्यस्माद्वे गत्यर्था ज्ञानार्थाश्चेति वचनेन प्राप्त्यर्थाल्लुङि आत्मनेपदे ते परे सिचि कृते रूपम् । पूर्येतेति दीर्घपाठे । पूः पुरी । यता प्राप्ता । कथम्भूता । आयता विशालेत्यर्थः । "पूः स्त्री पुरीनगर्यौ वा" इत्यमरः ॥

Colophon :

इति श्रीकालिदासकृते नलोदये सत्काव्ये चतुर्थोच्छ्वासः । समाप्तश्चायं ग्रन्थः ॥

इतीति । इति समाप्तौ । कालिदासेति कविनामकथनम् । सत्काव्य इति महाकाव्यभिन्नत्वसूचनम् । उच्छ्वासः श्वाससाध्यः परिच्छेदः समाप्त इत्यर्थः ॥

मिश्रानन्दकरस्त्वासीन्महोपाध्यायलक्षितः ।
पुण्यग्रामसभाजिता यष्टा वाणीमयः सुधीः ॥
वादेनैव विधिं कविं नयरुतैस्तर्केण वाचस्पतिं
वेदान्तेन शिवं मनुं स्मृतिमरै(यै)र्ज्योतिश्रयैर्भास्करम् ।
व्याकृत्येन फणाधरं क्षितिधरं नागाधिपं छन्दसा
धर्मो यस्य विजेतुमश्वति पुरं साङ्ख्येन चार्वाकपम् ॥
तत्सूनुः सुकृती क्षितीश्वरकृपापात्रः सुहृत्पालको
नानाशास्त्ररतो महापदयुतोपाध्यायसंज्ञान्वितः ।
सत्तर्कायतकाननोद्यतवलद्वादीन्द्रदन्तावल-
श्रेणीमर्दनचातुरीचणहरिर्विद्याकरो मैथिलः ॥
तस्यात्मजोऽभूद्विबुधाग्रगन्ता प्रज्ञाकरः सज्जनतापहन्ता ।
गुणालयः श्रीशपदानुमन्ता शास्त्रेषु दक्षः सुधियां नियन्ता ॥
स्वल्पेन वयसा तेन कृता टीका सुबोधिनी ।
पूर्वाचार्यकृतीर्वीक्ष्य सुधियां पश्यतां मुदे ॥

Colophon:

इति मैथिलश्रीप्रज्ञाकरमिश्रप्रणीतायां नलोदयकाव्यटीकायां सुबोधिन्यां चतुर्थ उच्छ्वासः । समाप्तेयं सुबोधिनी टीका ॥

शाके शराग्निशैलेन्दुप्रमिते मार्गकृष्णके ।
मुद्राक्षरेण काव्योऽयं बाबूरामेण लेखितः ॥

शाके १७३५ ॥ मार्गकृष्ण ॥ ४ ॥ शुक्रे । संवत् १८७० ॥ सन १२२० । साल । सन १८१३ ॥ ईसवी ; ताः १२ नवम्बर ॥ छापाकी आश्रीमदनपाल ॥

No. **11848.** नलोदयः, सव्याख्यः.

NALODAYAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 15 × 1½ inches. Pages, 56. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains the first Āsvāsa only.

Same commentary as that described under R. No. 101 of the Triennial Catalogue. By Kṛṣṇa.

No. 11849. नलोदयः, सव्याख्यः.

NALODAYAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 14 × 1½ inches. Pages, 160. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains two to four Āśvāsas complete.

Same work as that described under R. No. 101 of the Triennial Catalogue, but with different end as given below.

The commentary is called Kṛṣṇīya apparently after the name of the commentator Kṛṣṇa.

End:

येन नलेन पूर्वं धनराशिरितस्ततो विस्तारितः तेजस्वी चायं सदा कल्याणवर्ती सम्पदं जगामेति सम्बन्धः ॥

श्रीकालिदास[वि]रचितं काव्यं नाम नलोदयम् ।
लिखित्वा रामलिङ्गाख्य(:) सहायं (यात्) तु कृतार्थवान् ॥

Colophon:

इति श्रीकालिदासस्य नलोदयस्य विवरणे कृष्णीये चतुर्थ आश्वासः ॥
संवत्सरे मन्मथाख्ये एकादश्यां नलोदये ।
तुर्याश्वासं लिखित्वाहं टीकायुक्तं मुदान्वितः ॥

No. 11850. नलोदयः, सव्याख्यः.

NALODAYAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 17⅞ × 1½ inches. Pages, 90. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete in four Ucchvāsas.

Same poem as the above, but the commentary is by Tiruveṅkaṭasūri and is called Budhānandinī.

The former owner of this manuscript is stated to be Cakravarti Rāmasvāmi.

Beginning:

हृदय सदा यादवतः पापाटव्या दुरासदाया दवतः ।
अरिसमुदायादवतस्त्रिजगन्मा गाः स्मरेण दायादवतः ॥

हृदय । सदा । यादवतः । पापाटव्याः । दुरासदायाः । दवतः । अरिसमुदायात् । अवतः । त्रिजगत् । मा । गाः । स्मरेण । दायादवतः ॥

हृदयेति । हृदय मदीयचित्त । दुरासदायाः दुस्सहायाः । पापमेव अटवी अरण्यं तस्याः । दवतः दावानलात् । दुरितनिवर्तकादित्यर्थः । "दवो वनहुताशनः" इत्यमरः । पञ्चम्यर्थे तसिल् । अरिसमुदायादरिसङ्घात् । "भीत्रार्थानां

भयहेतुः" इत्यपादान(त्वा)त्पञ्चमी । त्रिजगत् त्रयाणां जगतां समाहारस्त्रिजगत् लोकत्रयम् । अवतः रक्षतः । राक्षसादिदुष्टनिग्रहेण लोकोपद्रवनिवर्तकादित्यर्थः । स्मरेण मदनेन । दायादवतः पुत्रवतः । मन्मथजनकादित्यर्थः । "दायादौ सुतबान्धवौ" इत्यमरः । प्रकृत्यादिभ्य इति तृतीया । एवंविधात् यादवतः श्रीकृष्णात् । पञ्चम्यर्थे तसिल् । त्वं सदा मा गाः न निर्गच्छ । ध्रुवमपाय इत्यपादानत्वात्पञ्चमी । सर्वदा तद्ध्यानपरायणं भवेत्यर्थः । इणो माङि लुङिति लुङ् । इणो गा लुङीति गादेशे "न माङ्योगे" इत्यडागमप्रतिषेधः ॥

End:

नलेन पुर्यतायतायतायता चिराय सा ।
सदायमुन्महा महामहामहास्त सम्पदम् ॥

नलेन । पुरी । अतायत । आयतायता । चिराय । सा । सदा । अयम् । उन्महाः । महामहाम् । अहास्त । सम्पदम् ॥

नलेनेति । नलेन । आयतायता अतिविस्तृता । भृशार्थे द्विरुक्तिः । सा निषधाख्या । पुरी राजधानी । चिराय बहुकालम् । अतायत विस्तारिता । धर्मपालनेन वृद्धिं प्रापितेत्यर्थः । उन्महाः उत्कृष्टतेजाः । अयं नलस्तु । महामहाम् । महान्तः महाः उत्सवाः यस्यां ताम् । आन्महत इति महतः आकारोऽन्तादेशः । सम्पदम् । अहास्त प्रापत् । ओ हाङ् गतौ । लुङ् । उत्तरोत्तराभिवृद्ध्या प्रतिदिनं नूतनां श्रियं प्रापेत्यर्थः । तेजोधानमहोविभाः; मह उद्भवः, इति चामरः ।

Colophon:

इति श्रीकालिदासकृतौ नलोदये महाकाव्ये चतुर्थोच्छ्वासः ॥

इति श्रीतिरुवेङ्गळसूरिविरचितायां बुधानन्दिन्याख्यायां नलोदयव्याख्यायां चतुर्थोच्छ्वासः समाप्तः ॥

No. **11851.** नलोदयः, विवरणसहितः.

NALŌDAYAḤ WITH VIVARAṆA.

Substance, paper. Size, 11 × 8¼ inches. Pages, 125. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

***Begins** on fol. 47a.* **The other works herein are Kāvyālaṅkāravṛtti 1a, Kāvyālaṅkārakāmadhēnu 111a.**

Complete.

Same poem as the above, but the commentary is different. This is restored from the MS. described under the next number.

Beginning :

प्रवर्तन्तेऽखिला भूतिस्थितिसंहृतयो यतः ।
. . . . ॥
प्रणम्याग्रे गणाधीशं वाग्देवीं (च यथागमम्) ।
नलोदयस्याल्पधिया व्याक्रिया क्रियते मया ॥

शब्दवैचित्र्यमात्रप्रकाशनपरे काव्ये गहनार्थव्यक्त्यर्थासंभवात् दुष्कर-पदपरिच्छेदमात्र(विधावप्यस्मत्सधर्मणा)मल्पप्रज्ञानां येषां केषांचिद्यदा कदाचिद्यः कश्चिदुपकारः स्यादित्येवमर्थोऽयमस्मदुद्यमः, न तु वैदग्ध्यविद्योतनायेति विदुषां सदा (अस्मिन् कर्मणि) तितिक्षितव्यम्। प्रारिप्सितस्य ग्रन्थस्यादौ तावद-विघ्नेन परिसमाप्त्यर्थं प्रचयार्थं च शिष्टाचारादभीष्टदेवताप्रणतिर्हृदयेत्यादि-श्लोकचतुष्केण . . . .

मू—हृदय सदा यादवतः पापाटव्या दुरासदाया दवतः ।
अरिसमुदायादवतस्त्रिजगन्मा गाः स्मरेण दायादवतः ॥

हे हृदय मनः सदा सर्वं कालं यादवतः परमपुरुषात् मा गाः; इणो गा लुङीति गाङादेशः । दुरासदायाः पापाटव्याः दवतः विपिनवदतिदुर्गमस्यानेकजन्मसञ्चितस्य दुरितस्याभिभूतात्, दवशब्दो वनवनानलयोर्वर्तते । अरि-समुदायात्त्रिजगदवतः हिरण्यकशिपुप्रभृतेर्वैरिसङ्घात्त्रिलोकीं पालयतः; भीत्रार्थानां भयहेतुरिति सूत्रेणापादानत्वम् । स्मरेण मदनेन प्रद्युम्नेन दायादवतः प्रशंसायां मतुप् । तस्य हि चारुदेष्णादयो बहवः पुत्रा विद्यन्ते । प्रद्युम्न एवात्मसमः पुत्रः । अनेनैव प्रशस्तपुत्रता भवतीत्यर्थः । इदमादौ हरिसंकीर्तनमात्मनश्च श्रोतॄणां च मङ्गलाय भवति । सर्वदा सर्वकार्येषु नास्ति तेषा . . . . . देवो मङ्गलायतनं हरिः इत्युक्तत्वात् । स्मरणसंकीर्तनाभ्यां हरेरमङ्गलनिरासो मङ्गलसंपत्तिश्चोभयं कवि.

End :

नलेन पुर्यतायतायतायता पुरेव सा ।
सदायमुन्महा महामहामहास्त संपदम् ॥

नलेन आयतायता अत्यन्तमायता । अथवा आयः अर्थे . . . आयतायता यस्याः पुर्याः समृद्धार्थागमा सा पुरी पुरेव पुरा यथा तथैव (अतायत) तनु विस्तार इत्यस्माद्धातोः कर्मणि लुङ् । विस्तारिता यथा पूर्वं तथैव विचित्रितेत्यर्थः . . . . उन्महा सदा सर्वदा अत्यन्तं तेजिष्ठः अयं नलः महामहां मह उत्सवः महांश्चासौ महश्च महामहः सोऽस्या अस्तीति सा महामह(ा तां) महासंपदमहास्त प्राप्तवान् । अयमर्थः—सा पुरी पूर्वमेव

. . . . विभवा भूत्वा अत्यन्तं विस्तारिता अयं नलस्तेजिष्ठः महोत्सवसंयुक्तां संपदं प्राप्तवान् ॥

Colophon :

इति नलोदयविवरणे चतुर्थाश्वासः ॥

No. **11852.** नलोदयः, विवरणसहितः.

NALŌDAYAḤ WITH VIVARAṆA.

Substance, palm-leaf. Size, 15 × 1½ inches. Pages, 96. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old. Complete.

Same work as the above.

No. **11853.** नलोदयः, सव्याख्यः.

NALŌDAYAḤ WITH COMMENTARY.

Substance, paper. Size, 8¼ × 6½ inches. Pages, 467. Lines, 12 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new. Complete.

Same work as that described under No. 11850 *ante*. By Tiruvēṅkaṭasūri.

No. **11854.** नलोदयव्याख्या.

NALŌDAYAVYĀKHYĀ.

Pages, 154. Lines, 7 on a page.

Begins on fol. 12*a* of the MS. described under No. 11845.

Contains the Āśvāsas one to four, the fourth Āśvāsa breaking off in the last stanza.

The commentary gives the Padacchēda (or division into words), the prose-order and meanings of words.

Beginning :

हृदय । सदा । यादवतः । पापाटव्याः । दुरासदायाः । दवतः । अरिसमुदायात् । अवतः । त्रिजगत् । मा । गाः । स्मरेण । दायादवतः ॥ इति पदच्छेदः । सम्बन्धस्तु— दुरासदायाः पापाटव्याः दवतः अरिसमुदायात् त्रिजगत् अवतः स्मरेण दायादवतः यादवतः देवात् हृदय सदा मा गाः । पदार्थस्तु— दुरासदायाः दुर्गतेरित्यर्थः । पापाटव्याः पापमेव अटवी तस्याः । दवतः दवानलभूतात् । अरिसमुदायात् शत्रुसंहतेः । त्रिजगत् त्रैलोक्यम् । अवतः रक्षतः । स्मरेण मन्मथेन प्रद्युम्नेनेत्यर्थः ; हेतुभूतेन । दायादवतः पुत्रवतः । "दायादौ सुतबान्धवौ" इत्यमरः । एवम्भूतायादवतः श्रीकृष्णा-

दन्यत्र हे हृदय अन्तःकरण । सदा सर्वदा । मा गाः मा स्म गमः । सदा तस्मिन्नेव रमस्वेत्यर्थः । एवमुत्तरत्रापि कुलकतया तस्मिन्मा गा इति सम्बन्धः ।

End:

सा कथंचित् सजीवनावना अभवत् । जीवनस्य प्राणस्य अवनेन रक्षणेन सह वर्तत इति सजीवनावना अभवत् । [अथवा सजीवनावनाभवदिति ।]

Colophon:

इति नलोदयस्य व्याख्याने तृतीयोच्छ्वासः ॥

अथ तुङ्गोपायस्य श्रवणेन नलस्य सानुगोऽपायस्य ।
वशगा गोपा यस्य स्वमनो भीमश्रिरं जुगोपायस्य ॥

* * * *

पुरा । इव । नैषधेन । पूः । यता । आयता । आयतायता । चिराय । च । सदा । अयम् । उन्महाः । महामहाम् । अहास्त । . . . . दानीम् ।

आयतायता अत्यन्तमायता । अतिविशालेति यावत् । पूः । नगरी । स्वपत्तनमित्यर्थः । पुरेव . . . . प्राप्तवता । नैषधेन नलेन । चिराय दीर्घकालम् । आयता प्राप्ता । किंच । सदा सर्वदा । उन्महाः उद्भूतर . . . . सोऽयं नलः । महामहाम् । महान् भूयान् महः उत्सवः यस्यां ताम् । सम्पदं सम्पत्तिम् । अहास्त प्राप ॥

No. **11855.** नलोदयव्याख्या

NALŌDAYAVYĀKHYĀ.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 70. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the Ucchvāsas one, three and four which last breaks off in the 23rd stanza.

This commentary on the Nalōdaya was composed by Ādityasūri.

Beginning:

हृदय । सदा । यादवतः । पापाटव्याः । दुरासदायाः । दवतः । अरिसमुदायात् । अवतः । त्रिजगत् । मा । गाः । स्मरेण । दायादवतः ॥ अस्यार्थः— हृदयेति । अनेन श्लोकेन कविरिष्टदेवतां नमस्कृतवान् । हृदय यादवतः पुरुषोत्तमात् सदा मा गाः अन्यत्र । तत्रैव रमस्वेत्यर्थः । हरेः किंविधात्, दुरा-

सदायाः पापाटव्याः दवतः दवाग्नेः अरिसमुदायात् त्रिजगत् अवतः रक्षतः स्मरेण दायादवतः पुत्रवतः । दायादौ सुतबान्धवौ ।

Colophon :

इत्यादित्यसूरिविरचितायां नलोद(य)टीकायां प्रथमोच्छ्वासः ॥

* * * *

इत्वाद्य(त्यादित्य)सूरिविरचितायां नलोदयटीकायां तृतीयोच्छ्वासः ॥

अथ तुङ्गोपायस्य श्रवणेन नलस्य सानुगोऽपायस्य ।
वशगा गोपा यस्य स्वमनो भीमाश्चिरं जुगोपायस्य ॥

अथ । तुङ्गोपायस्य । श्रवणेन । नलस्य । सानुगः । अपायस्य । वशगाः । गोपाः । यस्य । स्वमनः । भीमः । चिरं । जुगोप । आयस्य ॥

अथेति । तुङ्गाः उन्नताः उपायाः सामादयः दशोपायभूताः अश्वादयो वा यस्य तथोक्तस्य यस्य नलस्य ।

End :

ननु "रुट्क्रुधौ स्त्रियाम्" इति कोशात् स्त्रीलिङ्गस्य रुट्शब्दस्य अनलसमे इत्येदन्तविशेषणं कथं घटते ? सत्यम् । नात्र स्त्रीलिङ्गो रुट्शब्दो विवक्षितः । किं तु रुषिधात्वार्थ एव । तस्य पुंलिङ्गत्वान्नोक्तदोषावकाश इति ॥

No. 11856. नलोदयव्याख्या.

NALŌDAYAVYĀKHYĀ.

Substance, palm-leaf. Size, 15 × $\frac{7}{8}$ inches. Pages, 158. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the Ucchvāsas one to three and 22 stanzas of the fourth Ucchvāsa.

Same work as the above.

The copying is said to have been made from the original MS. of Kōṭagiri Veṅkaṇṇa and completed on Friday, the 13th day of Phālguna Bahula of the Vilambi year.

No. 11857. नागकुमारचरितम्.

NĀGAKUMĀRACARITAM.

Substance, paper. Size, $10\frac{7}{8}$ × $8\frac{1}{2}$ inches. Pages, 52. Lines, 20 on a page. Character, Dēvanāgari. Condition, good. Appearance, new.

Begins on fol. 15*a*. The other works herein are Citraratnākara 1*a*, Rāmacarita 41*a*.

Complete in five Sargas.

A Jaina poem treating of the story of Nāgakumāra also known as Pratyandhara, son of a Magada king by his wife Pṛthvīdēvī, daughter of King Śrīvarman and Śrīmatī. The name of Nāgakumāra was given to the hero because he is said to have been protected by the Nāga damsels when he accidentally fell into water. He is said to have lived for 1,000 years. The author of the poem is Malliṣēṇa who is stated to have been the disciple of Narēndrasēna, the younger brother of Jinasēna and the son of Kanakasēna, who was the son of Jinasēna.

Beginning:

भाति पुण्ड्रेक्षुवाटैश्च शालिक्षेत्रैर्विराजितम् ।
बहुधा पुष्पवाटीभिर्मातुलुङ्गादिसत्फलैः ॥
ग्रामैर्द्रोणमुखैः खेटैः मण्टपैश्च सपत्तनैः ।
खर्वटैर्नगरैर्नित्यं भाति संवाहनैरपि ॥
भोगिभिर्बहुभिः पूर्णं नागालयसमं पुरम् ।
भुवनत्रयविख्यातं तत्रास्ति कनकाह्वयम् ॥
दीर्घिकाकूपवापीभिः महोद्यानवनैः सदा ।
चतुर्दिशासु तद्भाति तटाकैः पद्ममाण्डितैः ॥
निर्जितारातिषड्वर्गशक्तित्रयसमन्वितः ।
सप्ताङ्गराज्यसम्पन्नो नृपस्तत्र जयन्धरः ॥

*   *   *

विशाललोचना नाम्ना तद्राज्ञी हंसगामिनी ॥
सज्जनश्रीरिवात्यन्तसरला मधुरस्वरा ।
तयोर्द्वयोः समुत्पन्नः श्रीधरः श्रीधराह्वयः ॥
सूनुः सर्वकलावेदी सत्यशौचगुणान्वितः ।
नीतिशास्त्रपरिज्ञानी स्वामिभक्तः प्रियंवदः ॥
जयन्धर इति ख्यातो मन्त्री मन्त्रगुणान्वितः ।
द्रष्टुमायातवान् भूपं वणिग्वासवसंज्ञकः ॥

*   *   *

सुराष्ट्राख्यजनान्तेऽस्ति गिर्यादिनगरं पुरम् ॥
श्रीवर्मा तत्र भूपालः श्रीमती तस्य वल्लभा ।
तयोर्द्वयोरभूत्पुत्रो हरिवर्मेति विश्रुतः ॥

तस्यानुजास्ति भूपाल पृथ्वीदेव्यभिधानिका ।
तस्या रूपं मयेदानीं लिखित्वानीतमीदृशम् ॥

* * * *

Colophon :

इत्युभयभाषाकविचक्रवर्तिश्रीमल्लिषेणसूरिविरचितायां नागकुमारपञ्चमीकथायां प्रथमः सर्गः ॥

End :

राज्यं कुर्वन्नसावस्थाद्वर्षाण्यष्टशतानि च ।
कुमारावस्थया तस्थौ वर्षाणां सप्ततिं तथा ॥
स्थितो वर्षचतुष्षष्टि छिद्रस्थावस्थया ततः ।
स भूत्वा केवलज्ञानी तस्थौ षट्षष्टिवत्सरान् ॥
एवं नागकुमारस्य प्रोक्तं वर्षसहस्रकम् ।
काले नेमिजिनेन्द्रस्य परमायुष्कमीदृशम् ॥
श्रुत्वा नागकुमारचारुचरितं श्रीगौतमेनोदितं
भव्यानां सुखदायकं भवहरं पुण्यास्रवोत्पादकम् ।
नत्वा तं मगधाधिपो गणधरं भक्त्या पुनः प्रागमत्
श्रीमद्राजगृहं पुरन्दरपुराकारं विभूत्या समम् ॥

Colophon :

इत्युभयभाषाकविचक्रवर्तिश्रीमल्लिषेणसूरिविरचितायां नागकुमारपञ्चमीकथायां निर्वाणागमनं नाम पञ्चमः सर्गः ।

जितकषायरिपुर्गुणवारिधिः नियतचारुचरित्रतपोनिधिः ।
जयतु भूपति(कि)रीटविघट्टितक्रमयुगो जिनसेनमुनीश्वरः ॥
अजनि तस्य मुनेर्वरदीक्षितो विगतमानमनोदुरितान्तकः ।
कनकसेनमुनिर्मुनिपुङ्गवो वरचरित्रमहाव्रतपालकः ॥
जितमदोऽजनि तस्य महामुनेः प्रथितवा(गू)जिनसेनमुनीश्वरः ।
सकलशिष्यवरो हतमन्मथो भवमहोदधितारतरण्डकः ॥
तस्यानुजश्चारुचरित्रवृत्तिः प्रख्यातकीर्तिर्भुवि पुण्यमूर्तिः ।
नरेन्द्रसेनो जितवादिसेनो विज्ञाततत्त्वो जितकामसूत्रः ॥
तच्छिष्यो विबुधाग्रणीर्गुणनिधिः श्रीमल्लिषेणाह्वयः
सञ्जातः सकलागमेषु निपुणो वाग्देवतालङ्कृतः ।

तैनेषा कविचक्रिणा विरचिता श्रीपञ्चमीसत्कथा
भव्यानां दुरितौघनाशनकरी संसारविच्छेदिनी ॥
स्पष्टं श्रीगणिचक्रवर्तिगुणिना भव्याब्जघर्मांशुना
ग्रन्थी पञ्चशती मया विरचिता विद्वज्जनानां प्रिया ।
तां भक्त्या विलिखन्ति चारुवचनैर्यावर्णयन्त्यादरात्
ये शृण्वान्ति मुदा सदा सुहृदयास्ते यान्ति मुक्तिं श्रियम् ॥

No. **11858** नागकुमारचारित्रम्.

NĀGAKUMĀRACARITRAM.

Substance, palm-leaf Size, $15\frac{1}{8} \times 1\frac{5}{8}$ inches. Pages, 234. Lines, 6 on a page. Character, Grantha and Tamil. Condition, good. Appearance, new.

In the beginning five leaves are lost

Begins on fol. 1*a*. The other work herein is Dravyasaṅgraha 118*a*.

Complete.

Same work as the above. The Tamil meaning of the stanzas is also given.

No. **11859.** पदाङ्कदूतम्.

PADĀṄKADŪTAM.

Pages, 12. Lines, 20 on a page.

Begins on fol. 250*b* of the MS. described under No. 11829.

Complete.

This is a small poem by Mahāmahōpādhyāya Kṛṣṇasārvabhauma. It contains 46 stanzas This was apparently composed in imitation of Mēghasandēśa. The substance of the poem is that a certain Gōpī finding Śrī Kṛṣṇa absent from her, sends to him his foot-mark as a messenger. It appears to be the same as the work noticed under No. 3888 on page 1467 of the India Office Library Catalogue, Vol. , Part VII.

Beginning:

गोपी भर्तुर्विरह[म]विधुरा काचिदिन्दीवराक्षी
उन्मत्तेव स्खलितकबरी निश्वसन्ती विशाला ।
अत्रैवास्ते मुररिपुरिति भ्रान्तिदूतीसहाया
त्यक्त्वा गेहं झटिति यमुनामञ्जुकुञ्जं जगाम ॥
अप्राप्यैव व्रजपतिसुतं तत्र कालं कियन्तं
मूर्छाप्राणप्रियतमसखीसङ्गता सङ्गमय्य ।

तस्योपान्ते कुलिशकमलस्यन्दनाङ्गादियुक्तं
पद्माकारं मुरहरपदश्चारु चिह्नं ददर्श ॥
तस्मिन्नुद्यन्नवजलधरध्वानमाकर्ण्य भूयः
कन्दर्पेण व्यथितहृदयोन्मत्ततुल्या ययाचे ।
प्रज्ञाहीनं वचनरहितं निश्चलं श्रोत्रहीनं
दौत्यं कर्तुं मुरहरपदो लक्षणं पक्ष्मलाक्षी ॥
रम्यं यावन्मुरहरपदे शोभते तावदेव
त्वय्यप्यास्ते कुलिशकमलस्यन्दनाङ्गाङ्कुशादि ।
गोपीदौत्यप्रकटनभिया सन्निधौ चक्रपाणे-
र्याने धीरप्रमुखमुखरो नूपुरो न प्रहीत ॥

End :

मूर्खा एव क्षणिकमनिशं विश्वमाहुर्न धीराः
खेदोऽस्माकं हरिविरहजः सर्वदैवास्ति चित्ते ।
नान्यः शब्दो वचनमपि यत्तादृशं तस्य किन्तु
प्रेमैवास्मत्प्रियतमकृतं तच्च गोपाङ्गनासु ॥
शाके सायकवेदषोडश(१६४९)मिते श्रीकृष्णशर्मार्पय-
न्नानन्दप्रदनन्दनन्दनपदद्वन्द्वारविन्दं हृदि ।
चक्रे कृष्णपदाङ्कदूतरचनं विद्वन्मनोरञ्जनं
श्रीलश्रीयुतरामजीवनमहाराजाधिराजादृतः ॥

Colophon :

इति महामहोपाध्यायश्रीकृष्णसार्वभौमविरचितं पदाङ्कदूतकाव्यं समाप्तम् ॥

No. **11860.** पारिजातहरणम्, सव्याख्यानम्.
PĀRIJĀTAHARAṆAM WITH COMMENTARY.

Pages, 86. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 2038.

Complete in two Āśvāsas.

A small Yamakakāvya by Nārāyaṇapaṇḍita, son of Trivikramapaṇḍita, with a commentary, the author of which is not given.

Beginning:

वन्दे धामानन्तं दधतं पुरुषोत्तमं त्रि(धा)मानं तम् ।
युतवसुधामानन्तं दैत्यानां यो व्यधाद्युधामानन्तम् ॥ १ ॥

वन्दे । धाम । अनन्तम् । दधतम् । पुरुषोत्तमम् । त्रिधामानम् । तम् ॥ युतवसुधामानन्तम् । दैत्यानाम् । यः । व्यधात् । युधा । अमान् । अन्तम् ॥

नमामि नारायणपादपङ्कजं करोमि नारायणपूजनं सदा ।
वदामि नारायणनाम निर्मलं स्मरामि नारायणतत्त्वमव्ययम् ॥
श्रीमन्नारायणप्राज्ञं नत्वा व्याख्यां करोम्यहम् ।
श्रीपारिजातहरणकाव्यराजस्य लेशतः ॥

वन्द इति । अहं तं पुरुषोत्तमं वन्द इत्यन्वयः । अनन्तं निरवधिकम् । धाम तेजः । दधतम् । त्रीणि धामानि मन्दिराणि श्वेतद्वीपानन्तासनवैकुण्ठाख्यानि सन्ति यस्येति त्रिधामानम् । युतवसुधामानन्तम्—युताः धरणीरमानागेन्द्रा अनेनेति । यः अमान् मानरहितः; अभिमानवाचि मन ज्ञान इति धातोः । दैत्यानामसुराणाम् । युधा युद्धेन । अन्तम् नाशम् । व्यधात् चकार ॥

गौः सह राजातानि प्राणिष्वपि यानि बहुधुराजातानि ।
येन सुरा जाता निःश्रमा बलारिश्च तेषु राजा तानि ॥

* * * *

धृतनिर्वेदमयानि ब्रह्म परं तापमिह भवे दमयानि ।
इति समवेदमयानि स्थिरो यदङ्गानि संश्रिवेदमयानि ॥

* * * *

Colophon:

इति श्रीनारायणपण्डिताचार्यविरचितपारिजातहरणस्य टीकायां प्रथमाश्वासः ॥

* * * *

इति श्रीमत्कविकुलतिलकश्रीमन्नारायणपण्डिताचार्यविरचितस्य पारिजातहरणस्य विवरणे द्वितीयास्वा(श्वा)सः ॥

End:

तरुश्रिया अस्तनन्दनः । पारिजातलक्ष्म्या निरस्तनन्दनवनः । सनन्दका सहितनन्दकाख्यखड्गः । नन्दनन्दनः नन्दस्य नन्दगोपस्य नन्दनः तनयः : श्रीकृष्णः । निजपुरे द्वारकाख्ये स्वनगरे । ननन्द सन्तुतोष ॥ इति ॥

पारिजातहरणाख्यकाव्यराट्पारिजातमवलम्ब्य नूतना ।
राजते विवरणाख्यसद्भुता लालिता सुमनसां सुमञ्जरी ॥

No. 11861. प्रभंञ्जनगुरुचरितम्.

PRABHAÑJANAGURUCARITAM.

Substance, paper. Size, 8¼ × 6⅝ inches. Pages, 51. Lines, 16 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Haṁsasandēśa 27*a*, Narakāsuravadhavyāyōga 47*a*, Subālavajrātundanāṭaka 74*a*, Tapatīsaṁvaraṇa 92*a*, Prabōdhacandrikā 174*a*.

This MS. is a copy of the MS. described under the next number.

Complete in five Sargas, but wants some portion in the middle of the fourth Sarga.

A poem dealing with the leading incidents in the life of a Jaina king named Prabhañjanaguru, son of Jayāvatī and Dēvasēna. The story is said to have been related by Śrīvardhana by way of illustrating the Jaina religious principles to Bhānu, son of Bhāmā and King Pūrṇēndu. The author of the poem is Yaśōdhara. The work is also called Yaśōdharacarita.

Beginning:

नत्वा जिनं महावीरं घनघातिप्रभञ्जनम् ।
प्रभञ्जनगुरोर्वक्ष्ये चरितं मतिशक्तितः ॥
. . . . जम्बूद्वीपस्य दीपने ।
अस्ति पुण्यहरं पुण्यं पूर्वदेशविशेषकम् ॥
पूर्णभद्रो नृपस्तत्र पूर्णेन्दुर्यशसां निधिः ।
बभूव भामिनी तस्य भामा भानुस्तयोः सुतः ॥
अथैकदा महीपालं वनपालो व्यजिज्ञपत् ।
उपदीकृतसर्वर्तुप्रसवः प्रमदाभिद्(ध): ॥
देवदेव वने देववृन्दवन्द्यो मुनीश्वरः ।
श्रीवर्धनाख्यया ख्यातः समयात्संयतान्वितः ॥
ततस्तद्वचननं श्रुत्वा तस्मै दत्वा धनं महत् ।
आरुह्य करिणं कान्तं निरगान्नगराद्विभुः ॥
अथ प्राप्य तदुद्यानं दूरादुत्तीर्य दन्तिनः ।
* * * *
प्रभञ्जनं विलोक्यासौ तुतोष मुनिदर्शनम् ।
हर्षाय भव्यलोकस्य किं पुनर्बन्धुतान्वितम् ॥

जगाम तं नमस्कृत्य पुरतोऽशोकशाखिनः ।
अधः स्थितं समद्राक्षीत् श्रीवर्धनमुनीश्वरम् ॥
तं प्रवन्द्य ततः श्रुत्वा धर्मं भेदद्वयान्वितम् ।
शङ्कादिदोषनिर्मुक्तं तत्त्वश्रद्धानपूर्वकम् ॥
भगवन्नस्य किं नाम तपसः कारणं च किम् ।
केन वा कारणेनात्र मम स्नेहो शिवा(ऽभिजा)य ते ॥
इति प्रभञ्जनाचार्यमुद्दिश्य पृथिवीभुजा ।

* * * *

तत्रासीन्नगरे राजा रजनीशयशोधरः ।
धरित्रीविहितानन्दो देवसेनसमाह्वयः ॥
जयाव तीप्रिया तस्य स्मरस्यैव जयावती ।
अभूत्स तीव्रदाराश जीवामरशशासिनः? ॥
सुतौ तयोरजायेतां सन्तप्तकनकच्छवी ।
आद्यः प्रवरसेनाख्यो द्वितीयश्च प्रभञ्जनः ॥
वसुन्धरामुपायंस्त प्रवरः प्रवरः सताम् ।
पृथिवीं गुणसम्पन्नां पृथिवीं च प्रभञ्जनः ॥
मु(ऋ)जुत्वादृजुनामानमसूत प्रवरप्रिया ।
प्रभञ्जनप्रिया पुत्रं सरलं सरलक्रियम् ॥
वेण्णातटीपुराधीशं विधाय प्रवरं पिता ।
प्रभञ्जनं च वम्भेशं तपसे निरगाद्गृहात ॥

* * * *

Colophon:

इति प्रभञ्जनगुरोश्चरिते यशोधरचरिते पीठिकाबन्धे सरलस्य विशालायां राज्यलाभो नाम प्रथमः सर्गः ॥

End:

पूर्ववैरानुभावेन पतिपुत्रविनाशनम् ।
कृतं तया तथैवात्र वैरं कुर्वन्तु मा बुधाः ॥
इति प्रभञ्जनाचार्यचरितं मुनिनोदितम् ।
श्रुत्वा स पूर्णभद्रोऽपि भानुनामाग्रहीत्ततः ॥

* * * *

गुणभृदनघसंज्ञः साधकं नामकर्म समधिगततपोभिः सम्यगासाद्य सद्यः ।
सह सरलतपोभृत्पूर्णभद्रो यतीन्द्रः समगमदनवद्यामच्युताख्यां महाख्याम् ॥
कृत्वा घोरतपोऽ(पि चा)न्यमुनयो मान्या मनोजारयो
जम्भारातिसुता नतोरुमहसः श्रीभानुसुन्दादयः ।

सुन्दाद्रौ सरले सुसुन्दरतले त्यक्त्वाङ्गसङ्गं समं
सर्वेषां सकलाः समापुरमलां कल्पामराणां श्रियम् ॥
ते सर्वेऽपि समिद्धशुद्धवपुषो व्यापुष्यदात्मश्रियो
दिव्यालङ्कृतिलेपनाहृतिगतिस्रग्गन्धवाग्वाससः ।
कुर्वाणा जिनवन्दनामुरुगुणाभोगान्मनोव(न्धवः)
भुञ्जाना भवभीरवोऽपि विविधाः शश्वत्सुखादासते ॥

Colophon:

इति प्रभञ्जनगुरोश्चरिते यशोधरचरिते पीठिकाबन्धे प्रभञ्जन . . .
. . . भद्रप्रभृतिमहर्षिस्वर्गगमनं नाम पञ्चमस्सर्गः समाप्तः ॥ प्रभञ्जनचरितं समाप्तम् ॥

No. **11862.** प्रभञ्जनगुरुचरितम्.

PRABHAÑJANAGURUCARITAM.

Substance, (Śrītāla). Size, $13\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 22. Lines, 9 on a page. Character, Kanarese. Condition, much injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Kuvalayānanda 12*a*.

Complete in five Sargas.

Same work as the above.

No. **11863.** भद्रबाहुचरितम्.

BHADRABĀHUCARITAM.

Substance, paper. Size, $11 \times 8\frac{5}{8}$ inches. Pages, 52. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete in four Paricchēdas, which are—

१ दीक्षाग्रहणवर्णनम्.
२. षोडशस्वप्नकथनगुरुविहारकथनम्.
३. अभीष्टस्वरूपप्राप्तिकथनम्.
४. श्वेताम्बरमतोत्पत्तिवर्णनम्.

A Jaina poem dealing with the life of Bhadrabāhu, son of Matallikā and Padmadhara, King of Kōdipura. Having been educated by an ascetic at an early age, Bhadrabāhu became successful in controversies and is said to have done severe penance and established the Śvētāmbara form of Jainism. This story is said to have been related by Vīrasēnamuni to Cēlinī and her husband Śrēṇika, King of Magadha. The author of the poem is Ratnanandi.

Beginning :

सद्बोधभानुना भित्त्वा जनानामान्तरं तमः ।
यः सन्मतित्वमापन्नः सन्मतिः सन्मतिं क्रियात् ॥

वृषभं वृषभं वन्दे वृषभाङ्कं वृषार्चितम् ।
वृषतीर्थप्रणेतारं भेत्तारं कर्मविद्विषाम् ॥

परमेष्ठिपदाप्तानां परमेष्ठिपदाप्तये ।
परमेष्ठिपदान् वन्दे सत्पञ्चपरमेष्ठिनाम् ॥

आर्हती भारती पूज्या लोकालोकप्रदीपिका ।
रजो विधूय नो नित्यं तनोतु विमलां मतिम् ॥

स्वेष्टार्थसिद्धिकरणाश्चरणाः सन्तु गौरवाः ।
गौरवाप्तास्सुचरण(ा)स्तरणै(णि)र्मे भवाम्बुधौ ॥

शक्त्या हि(ही)नोऽपि वक्ष्येऽहं गुरुभक्त्या प्रबोधितः ।
श्रीमद्रबाहुचरितं यथाज्ञातं गुरूक्तितः ॥

यश्श्रु(च्छ्रु)तं मुग्धबुद्धीनां मिथ्यामोहमहानमः ।
धुनुते तनुते शुद्धजैनमार्गेऽमलां मतिम् ॥

अथात्र भारते वर्षे विषये मगधाभिधे ।
पुरं राजगृहं भाति पुरन्दरपुरोपमम् ॥

नताशेषनृपश्रेणिः श्रेणिकः श्रेयसां निधिः ।
भावुकः पालकस्तस्य चेलिनी महिषी सती ॥

एकदाऽसौ विशां नाथो विदित्वा वनपालतः(कः) ।
विपुलाद्रौ महावीरसमवसृतिमागतम् ॥

* * * *

मयि मुक्तिं गते राजन् गौतमाख्यः सुधर्मवाक् ।
जम्बूनामाः(म्ना)भविष्यन्ति त्रयोऽमी केवलेक्षणाः ॥

विश्वश्रुतविदो विष्णुर्नन्दिमित्रोऽपराजितः ।
तुर्यो गोवर्धनो नाम भद्रबाहुस्तथान्तिमः ॥

* * * *

Colophon :

इति भद्रबाहुचरिते आचार्यश्रीरत्ननन्दिविरचिते भद्रबाहुदीक्षाक्रमवर्णनो नाम प्रथमपरिच्छेदः ॥

End :

रवा(वा)दीभेन्द्रमदप्रमर्दनहरिः शीलामृताम्भोनिधिः
शिष्यः श्रीमदनन्तकीर्तिगणिनः सत्कीर्तिकान्ताजुषः ।

सृत्वा श्रीललितादिकीर्तिमुनिपं शिक्षागुरुं सद्गुणं
चक्रे चारु चरित्रमेतदनघं रत्नादिनन्दी मुनिः ॥

भद्रदोश्चरितं वक्तुं शक्यतेऽल्पधिया कथम् ।
तथाप्यविस्तरं दृष्यं(श्यं) हीरकार्योपरोधनः ॥

श्वेतांशुकमतो(द्भू)ति मूलां ज्ञापयितुं जनान् ।
व्यरीरचमिमं ग्रन्थं न स्वपाण्डित्यगर्वतः ॥

